॥ अथ साहित्यरत्नाकरप्रारंभः ॥ श्रीरामः ॥

१

श्रीगणेशायनमः॥अथसाहित्यरत्नाकरप्रारंभः॥आलिंग्यगाढमुदरंपितुरर्धजानेरुत्संगवर्त्मवतुबालगजाननो
नः॥यत्कुंभयोर्गिरिसुताकुचपार्श्वभाजोस्तंन्यंपिपासतिगुहास्त्रिभिराननाख्यैः॥१॥श्रेयोमोदधातुद्वारदशाश्रि
श्रीभास्कराभास्कराहारासारनिरासकारिमधुरव्याहारिणीहारिणी॥मुक्ताभूषणपोषणास्मितलवश्रीसाधुनासा
धुनालावण्येनानिनेनानिर्जितवतीरंभारतीभारती॥२॥नमस्तस्मैकदंमदुर्दांबुधिप्रनष्टचेष्टाखिलजंतुसंतति
प्रसार्यमाणैःपटुदीर्घरश्मिभिर्जगत्त्रयीमुग्धरतेविवस्वते॥३॥नित्यंरसाईहृदयेंधनसंप्रयुक्तदाक्षायणीविरहदारु
णपावकस्य॥उत्थूतधूमकलिकामुपकल्पमूलंस्वेदच्छलेनवहतेमहतेनमोस्तु॥४॥लक्ष्मीवक्षसितारहारवलये
तस्याःप्रियंसोदरंविभ्रल्लुभ्रमणिंपरंचनयनेनाभोरुभद्रासनं॥कूरूभ्रूगलनाभिरोमलतिकामित्राणिपंचायु
धान्याशिष्यन्करपंकजैरवतुनःकश्चिन्महाकामुकः॥५॥अनंतमत्यंताविशुद्धविग्रहंमहश्चिदानंदमयंनिरामयं
अशेषवेदांतविचित्यवैभवंप्रशास्तमस्मित्प्रविभास्वरंस्वतः॥६॥तदव्यपंज्योतिरनाद्यविद्ययाहृतंरजःसत्वतमो
गुणात्मया॥प्रजापतिःश्रीपतिपार्वतीपतिप्रपंचरूपाणिमुहुःप्रपद्यते॥७॥तदेकदात्मन्यखिलंचराचरंनिधाय
नारायणनामकंमहः॥फणींद्रपर्यंकतलेपयोनिधौचिरायरेमेनिजयोगनिद्रया॥८॥ततोस्यनाभीसरसःस
रोरुहंसमुद्यद्योयस्यसमस्तमंबरं॥वितन्वदिंदीदिरशावविभ्रमंदलांतरालेषुचिरंव्यलीयत॥९॥ततस्ततस्ता
मरसास्समुद्यतश्चतुर्मुखस्तद्रजसेवराजसः॥जगत्स्रस्रष्टुर्जगदीशशासनात्समाधिसंपन्नमनामनागभूत्
॥१०॥अस्मात्समाधिसचिवान्मनसस्तदीयात्सुत्रामरीचिपुलहप्रमुखाः प्रभूताः॥यस्तुत्रपोत्रतदपत्यपरंपराभि
रापूरितोभवदजांडकटाहगर्भः॥११॥तेषांगिरोमुनिवरादुदयंप्रपेदेभास्वानिवोदयगिरेर्हरितोमुनींद्रः॥दोषानु
संगरहितश्चनभोगमार्गभ्रांतोनिराकृततमाःशुचियोगदीपः॥१२॥गोत्रेचतस्यसमभूदभिजातवंशोवाराणसी
स्थपपदेनभुविप्रसिद्धः॥तत्राभवन्बुधवरास्त्रिपुरारिसोमयज्वादयःशुभतपःश्रुतशीलवृत्ताः॥१३॥देवान्हवि
र्भिरतिथीनशनेश्चशिष्यान्विद्योपदेशविधयापरितोषयद्भिः॥वाराणसीविहितनित्यनिवासदीक्षैर्यैःपांडितैर्भरत
खंडममंडिपुण्यैः॥१४॥सर्वज्ञतःशमितकामरुषोगिरीशात्श्रीपार्वतीप्रियतमान्त्रिपुरारिनाम्नः॥तस्माद्बुधा
न्बहुमुखोद्गतवाग्विभूतिर्धर्माह्वयःसमुदभूत्साहितःकुमारः॥१५॥नागांबिकांसुभगगुणांप्रतिरूप्यकन्यामेकां

१

गृहाश्रमनिवासरूतेचिरंयः॥अन्यप्रतिग्रहभयोनिगमागमानांसत्संप्रदायमकरोद्वनावरुंडं॥१६॥शंभोर्यदीय
शातरुद्रकृताभिषेकतोयैर्ललाटगलतापहरैःकपर्दे॥गंगात्मनापरिणतैर्दधिरेवसिक्ताःनूनंजटावलिलताःशशिपु
ष्पशोभां॥१७॥यःसप्तवारविहितैर्वरदास्त्रहृष्टात्सादमंत्रकपुरश्चरणैर्महेशात्॥आसप्तमाद्दुरमगान्निजवं
शराजानांविछेदशून्यविमलारिबलशास्त्रबोधं॥१८॥विधिवदनुष्ठितकर्माधर्मारब्धःसुधीःसंस्फुरत्स्वधर्मा॥जनयां
बभुवतनयान्नारायणपर्वतेशरामाख्यान्॥१९॥पद्मपदासरक्रमजडाक्रमारोहणावरोहविषमक्रमाक्र
मसुखावधानाधनि॥परिक्रमणचक्रवर्त्मभिधयाष्टदिक्रूढया चचारबहुशःक्षितौहिजरथेननारायणः॥२०॥
जितारामावधानिप्रमुखंमुरुमरुद्वेगवद्वेदचर्चागोष्ठ्यानारायणार्यःसदसिबुधवरैःश्लाघ्यमानावधानः॥संतुष्ट
धर्मभूपादलभतशिबिकांचामरछत्रपूर्वंगर्वावर्वावधानीश्वरशरभघटागंडभेरुंडचिन्हं॥२१॥तस्यानुजःपर्वत
नाथसूरिरासीद्रशेषागम पारदृश्वा॥ऐकात्म्यलीलावितमादिमानांषट्दर्शनीजन्मकृतांमुनीनां॥२२॥एकंको
पिसकदर्शनंभ्रमकरंपाणेोललाटेदधौकश्चित्कामविघातकंपदतलेकश्चिल्लिवछोभकं॥निःशेषभ्रमभंजिकांशि
वकरींकामप्रदांपर्वताधाशार्यःसमदर्शयद्दर्शनषट्दर्शिनीमद्भुतं॥२३॥वाग्मित्वद्युतिपुष्पिविष्णुभजनाभीष्ट
र्थविश्राणनेस्तस्मिन्विस्मयमावहत्यहिपतौनिस्त्रैकतोवारिता॥हिस्रंपुष्यवतोरुशानुषुगतांत्रेत्रंचतुष्कंचिरादु
स्तन्संसनकादिषुप्रशमितंपंचत्वमिंद्रद्विषु॥२४॥येनस्वैरमभाणिपाणिनिमतंत्राणादिकाणादवाग्गुंफेस्पष्टम
घाट्टिभट्टगुरुवागुट्टीकेतेकुट्टिमे॥निःशंकंनिरयंकिशंकरमतंवासोदवासांग्रिवाग्ध्वन्यध्वन्मुदलास्यखंडनिरवि
लायाषांडषंडाटवी॥२५॥योवादेनजनार्दनाह्वयबुधंमध्येविपश्चित्सभंजित्वाविंदतवादिकेसरिपदंग्रोदंतदीयंस्व
यं॥मायावादिभयंकरास्यधिरुदारत्वूर्जितादार्जितालिंचोदंचय तिस्मकीर्तिमतुलांप्रच्यावयन्वेछवं॥२६॥आटो
पोद्भटनाट्यधूर्जटिजटाकोटीरकोटीनटद्गंगातुंगतरंगरिंगणभरत्रस्पर्धिवाग्वैभवः॥सोयंस्वप्रतिभादृष्टान्निर्कृण
ग्रोद्दीप्तषट्दर्शनीरत्नस्रङ्मयकंधरोयदनुजोरामाह्वयःपांडितः॥२७॥तस्यासवंतनाथसूरिजलधेश्रीवल्लभांबा
विधद्गंगासंगजुषोलसद्गुणमणेःपत्न्योदयश्चंद्रवत्॥सोयंधर्मसुधीर्गवांविलसितैःकर्तुंरसालंक्रियासंस्फूर्तिं
समुदंचयेयमधुनासाहित्यरत्नाकरं॥२८॥अत्रकविपक्षेगवांविलसितैःसौरलंक्रियासंस्फूर्तिरसाःवस्त्वमा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२ णाः शृंगारादयः अलंक्रियाः उपमादयः इदंगुणादीनामुपलक्षणं॥ तेषांसंस्फूर्तिनिरूपणंकर्तुंसाहित्यरत्नाकरंनामालंकारग्रंथंसमुदंचयेयंनिर्मास्यामीत्यर्थोवगंतव्यः॥ चंद्रपक्षेगावः किरणाः रसालंक्रियासंस्फूर्तिरसाभूमिः तस्याः अलंक्रियायाः रत्नाकरात्मिकायाः मेरवलायाः संस्फूर्तिशोभांउदंचनंवर्धनंरत्नाकरस्यमहीमेरवलात्वंभूतधाध्यधिमेरवलेत्यादिनेघंटिकवचनेनाः वगंतव्यं॥ अत्रचंद्रवदहमपिगोविलासेःरसालंकारस्फुरणायरत्नाकरंउदंचयेयमित्युपमा॥ स्यादेवंचंद्रवदितिहठाद्विकवछ द्वोपादानात् क्षीरोदपर्वतनाथसूरिजलयेर्यल्लमांबावियद्गालसद्गुणमणेरित्यत्रचत्रयोरूपकालंकाराः॥ गवांरसालंक्रियासंस्फूर्तिमित्यत्रत्रयः शोषालंकाराः किरणभूमिभूषणानांवचनशृंगारादयुपमादिभ्योभेदेपिश्लेषशब्दबलेनअभेदाध्यवसायात्भेदेअभेदरूपातिशयोक्तिश्चसर्वैरेतेरुपमानुप्राणितेतितस्यास्तेषांचांगांगीभावेनसंकरः॥ इतरेषांतुसंसृष्टिरितिलक्षणानितुउपरिष्टाल्लक्ष्यंतेअलंकारतरंगेएवंतावत्सारीसितग्रंथपरिसमाप्तिपरिपंथिप्रत्यूहप्रशमनपटुतयाप्रयोजनवतींशिष्टाचारानुमितस्मृतश्रुतिसिद्धतयाप्रमाणवतीं॥ ग्रंथारंभस्यअंगभूतांप्रचयगमनायप्रपंचितांपोनः पुण्येनबाहिरपिकृतांदेवतानुग्रहाशासनप्रणामरूपांमंगलचर्यांशिष्यशिक्षार्थंआदिमेषुपंचसुश्लोकेषुनिबध्नास्मिनूश्लोकेत्रेक्षावत्प्रवृत्यंगभूतंविषयादिचतुष्टयमसूत्रकृत्॥ तत्ररसालंकारादिर्विषयः तदवबोधः प्रयोजनंतत्कामोधिकारीसंबंधश्चयथासंभवमुन्नेयः॥ इदानींस्वग्रंथेप्रेक्षावतांप्ररोचनामुद्भावयितुमाह॥ विरिंचिवनिताकरांचितविपंचिकासंचरत्स्वरप्रसरमाधुरीरसरमा॰॰धुरीणागिरः॥ जयंतिममंदरक्षुभितसिंधुबंधुभ्रमीनिरर्गलविनिर्गतबहुलभंगभंगीभृतः॥ २॥ रसरमारससमृद्धिः सिंधुबंधुः समुद्रः॥ अम्याभ्रमेणइत्यंभावेतृतीयाभंगास्तरंगाः भंगीरवस्तादिशोषाः अत्रविपंचीस्वरधर्मस्यमाधुर्यस्यतरंगधर्मस्यभंग्याश्चवचनेषसंभवात्सादृश्यक्षेपात्प्रकृतस्याप्रकृतधर्मसंबंधासंभवमूलोनिदर्शनाभेदावर्थालंकारोवस्तुनुप्रासाः शब्दालंकाराः तेषांसर्वेषांसंसृष्टिः॥ सर्वातिशायित्वंव्यंग्यं॥ नवरसज्ञानामेवात्रप्रवृत्तिः नसर्वेषामित्याह॥ रसप्रसरनिर्भराः कविगिरांप्रसाराः परंमुदंविदधतेहृदिस्फुरदमाजिकाब्धामृतेः॥ सुधाकरकरांकुरव्यतिकरेणचंद्रोपलाद्रवंतिशिशिराश्चिरादविनिबंध्यवध्योपलाः॥ ३॥ परमितिपदस्यकेवलार्थवाचिनोहृदीत्यनेनसंबंधः अत्रयथासुधाकरकराः शिशिरशिलाएवद्रवयंतिनपरुषान्याषाणांतर्भासरसकविगिरोपिसरसहृदयेषेवमुदमुदंचयंतिनशुष्कतर्ककर्कशेषुतिकविगिरांसुधाकरकराणांचनिरपेक्षवाक्यद्वयेबिंबप्रतिबिंबभावेनसाधर्म्यनिर्देशात्दृष्टांतालंकारः सचरत्यनुप्रासेनसंसृज्यतेइदानींस्वग्रंथवैय्यर्थ्यंपरिहर्तुमाह॥ अलंक्रियाः पूर्वतनैः प्रणीताः नयोजिताः काश्चननायकेनकेश्चिल्लुक्षिंभरिभिर्निबध्नासोदीयसाकाश्चननायकेन॥ ३॥ अत्रअलंक्रियाशब्दः साध्यवसानलक्षणयाअलंकारप्रतिपादकग्रंथपरः ऐक्यप्रतिपत्तिः प्रयोजनंक्षोदीयसाक्षुद्रतरेणद्व्यक्षनूस्थूलदूरेत्यादिन्यायेनादिपरलोपपूर्वगुणेकुक्षिंभरिभिः स्वोदरपूरकैः फलेग्राहिरात्मंभरिश्चेतिचशब्देननिपातनोस्साधुः॥ नायकोरत्नंनेताचस्वालंकारस्यतद्धेलक्षण्यमाह॥ दिव्येनोत्तमनायकेनघटितासेयंमालंकृतिः सद्भिरुतिनाविदेहतनयावक्षोरुहस्थायिना॥ तत्तादृक्कदशंकुकीर्तिपयसोनेत्यावहश्रीजुषानिस्त्रासेनमहेंद्रनीलमणिनोदारेणसंशोभते ३२ तदेकनादृक्ष्यस्यातनादृक्उपमाशून्यमित्यर्थः॥ क्षीरमध्येक्षिपेंनीलंक्षीरंचेन्नीलतांव्रजेत्॥ इंद्रनीलः सविज्ञेयः सर्वसंपत्प्रदायकइत्यत्रकलक्षणलक्षितत्वंद्योतयितुंतादृगित्यादिविशेषणंमहेंद्रनीलपदंसाध्यवसानलक्षणयारघुनायकपरंअनायकदुर्नायकलोकोत्तमनायकसंघटितेषुलंकारेषुलोकोत्तमनायकघटितालंकारएवसकृदाम्नातिशायदर्शनात्तथाविधेस्वालंकारेभूयानादरोभवेत्वैय्यर्थ्यशंकानुप्रकृतप्राचीनेषेवभविष्यतीतिश्लोकद्वयतात्पर्यार्थः अत्रश्लेषानुप्राणितातिशयोक्तिरलंकारः एकेनचरितार्थत्वादितरानर्थतायासामतग्रंथस्थितावन्यग्रंथानांकिंनजायते ३३ काव्यामृतावलोकनयामृदुशीतलानिश्रीरामदिव्ययशासाकरभीकृतानि॥ एषांमनांसिघनसारसमानितेषामेषाकृतिर्वितनुतांकमपिप्रहर्षं ३४ कतिचनशुभपदसरणेतमोभराव्यंजयंतिदोषोघान्॥ शमयतिचभूषयतिवामग्र्यः साहिनीलकंठएवपरं॥ ३५॥ काव्यमीमांसायामनारंभणीयत्वशंकांनिवारयितुमाह॥ मीमां॰॰पुनरत्रकाव्यममुनासिध्यंतिकीर्त्यादयोदुःकाव्यंहिनिषेधभाग्तिरयारामायणादेः क्षतिः॥ कांतासंमिततोपदेशकृतयानार्येवकाव्यश्रियासाध्यंस्यात्क्वयतेहिताहितकृतेपुंसांप्रवृत्त्यादिकं॥ ३६॥ काव्यममीमांस्यमितिवदतावक्तव्यं॥ किंविषयाभावात्प्रयोजनाभावाद्वा॥ नाद्यः वक्ष्यमाणलक्षणस्यैवकाव्यस्यविषयत्वात्॥ नद्वितीयः॥ काव्यस्यकीर्त्यादिविविधपुरुषार्थसाधकतयातन्मी

स्यं

मांसाथाऽपिप्रयोजनवत्वात्॥अंगानांप्रधानफलेनैवफलवत्वनियमात्काव्यस्यार्थवत्वंकाव्यप्रकाशकारोभिरुक्तं
३ काव्यंयशसेऽर्थकृतेव्यवहारविदेशिवेतरक्षतये॥सद्यःपरनिर्वृतयेकांतासंमिततयोपदेशयुजेति॥विश्वो
त्तुंघनजांघिकीर्वितनुतेकीर्तिंविधत्तेश्रियंहेलाधिक्कृतयक्षराजविभवांचिंताकरंहेलयं॥दुग्धेस्वादुतरान्नसा
न्वितरतिस्फारंकलाकौशलंकाव्यंनिर्वृतिमावहत्यपिपरिस्पंदावहंचेतसः॥३६॥परिवडडडविण्णाणंसंभा
विज्जइजसोविसपंतिगुणाः॥सव्वइसपरिसाचिरिअंकिंतंजेणहरंतिकवालावाइति॥छाया॥परिवर्धतेवि
ज्ञानंसंभाव्यतेयशोविसर्पंतिगुणाः॥श्रूयतेसकुपुरुषचरितंकिंतद्येननहरंतिकाव्यालापाः॥नचकेवलदृष्ट
मात्रफलकत्वंकीर्तिसुखेनस्वर्गादेरपिफलत्वात्॥कीर्तिस्वर्गफलामाहुरासंसारंविपश्चितइत्यकृकत्वात्॥
काव्यालापांश्चवर्जयेदितिस्मृत्याकाव्यस्वरूपस्यैवनिषिद्धत्वात्स्वर्गादेरपिदूरोत्सारितेति॥तृतीयविकल्पोपि
नावकल्पते॥निषेधस्यमुद्रारक्षसाद्यसत्काव्यविषयत्वात्॥अन्यथारामायणादेरपिहेयताप्रसंगात्॥ततःश्रव
णमननादिभ्योपिविष्णुकथानिवर्तककाव्यनिर्माणमेवश्रेयःसाधनमितिमन्वानोभगवान्वाल्मीकिर्निर्ममेहि
रामायणं॥असत्कीर्तनकांतारपरिवर्तनपांसकलां॥वाचंशौरिकथालापगंगयेवपुनीमहे॥इत्यभिधायवेद व्या
सोपिहरिवंशनिर्माणेप्रवृत्तेसेवेहवाणीजनताघौघरणीसुधारणीसंसृतिसिंधुतारिणी॥माऽनंतनामावलिदिव्यह
रिणीसवलत्पदेर्थवतीपिसाविकारिणीत्यादिनारदीयादिपुराणोक्तवचनैःविष्णुकथाप्रतिपादकवाक्यानांप्रश
स्यमानत्वाच्चतुरीयेपिविकल्पेइदंवेद्यं॥किंपुरुषार्थपर्यवसायित्वंतदसाधकत्वादावहोस्वित्कुसादे
वप्रमाणाद्वेदादेर्हितप्रवृत्तिनिवृत्तिसिद्धेरतथाविधस्याप्यस्यवेय्यर्थ्यादितिनाद्यः॥तत्साधकत्वंस्वपू
र्वमेवोदीरितत्वात्नाहितायःनिषेधशास्त्रस्यान्यपरत्वोक्तेःअस्यापिकृत्सप्रमाणत्वात्अथमन्यसेऽपदेशो
नरागद्वेदादेवप्रवृत्तिनिवृत्तिसिद्धेकाव्यस्यततोअतिशयाभावाद्वैय्यर्थ्यमितिमेवंमंस्थाःअतिशयसद्भावा
त्तथाहिउपदेशोनामकर्तव्याकर्तव्ययोरन्यतरबोधकंपौरुषेयमपौरुषेयंवावाक्यंतदेवशासनाशास्त्रं
तदुक्तमाचार्यैःप्रवृत्तिर्वानिवृत्तिर्वानियोगेनकृतकेनवा॥पुंसांयेनोपदिश्यतेतच्छास्त्रमभिधीयतइतिसचो
पदेशस्त्रिविधः॥प्रभुसंमितःसुहृत्संमितःकांतासंमितश्चेतित्रप्रभुसंमितोवेदःशब्दप्रधानत्वात्तथाहिलो

केप्रभुर्वाज्ञात्रेणपुंसःप्रवर्तयतिनिवर्तयतिचअन्यथादंडमापादयतिएवंवेदोपिशब्दप्राधान्येनैवानियोज्यंय
थायथंप्रवर्तयतिनिवर्तयतिचविपक्षेप्रत्यवायंसूचयतिअत्रार्थस्यप्राधान्यमात्रत्यागःनस्वरूपतःतथात्वेत्
न्मत्तप्रलपितवदप्रवर्तकत्वेनवेदस्यस्यात्शब्दश्चात्रविधिप्रत्ययोपलक्षितंवाक्यंतस्यप्राधान्यंप्रवर्तकत्वंतेन
शब्दप्रधानंशास्त्रंप्रभुसंमितमितिलक्षणमुक्तंभवतिननुपुरुषप्रवृत्तिरूपांभावनांविदधानःप्रत्ययएवप्रवर्त
कःतस्यप्रेरणार्थोविधानात्तत्कथंवाक्यंप्रवर्तकमितिचेत्प्रत्ययःप्रवर्तकइत्याकलयन्सचाविशिष्टइतिकि
न्नाचकलइत्वान्तदाकलनेवावाक्यमेवप्रवर्तकमितिकेमितिनावासासीत्नाहिभावयेदित्यकेकश्चित्प्रवर्त
तेकिंत्विदमनेनैवंभावयेदितितथासत्यंशास्त्रयाविशिष्टभावनाभिधायिप्रत्ययःप्रवर्तकइतिवाक्यमेवप्रवर्त
कमित्युक्तंभवतिइदमुदीरितमाचार्यैःकारिकायांकथमाद्यपेक्षितेःपूर्णःसमर्थःप्रत्ययोविधोतेनप्रवर्तकंवाक्यं
शास्त्रेस्मिन्बोदनोच्यते॥अतोवेदवाक्यानामन्यथापाठेअन्यथानुष्ठानेअननुष्ठानेवामहान्प्रत्यवायः॥अध्य
यनविधेःफलवदर्थावबोधपर्यंततात्तेनप्रभुसंमितोवेदःसुहृत्संमितःपुराणादिःअर्थप्रधानत्वात्अत्रअर्थो
वाक्यार्थःनपदार्थःतस्याप्रवर्तकत्वात्तत्प्राधान्यंचार्थवादात्मकाःपुराणादयोवेदवदेवंकुर्यादितिविधिबलेनपु
रुषंप्रवर्तयितुंनेशतेकिंतुप्राचीनपुरुषकथाशरीरवर्णनद्वारासुहृद्दत्वयुक्तिभिरनुनीयप्रवर्तयंतिकांतासं
मितोपदेशस्तुकाव्यंध्वनिप्रधानंशास्त्रंकांतासंमितमितिलक्षणंयथाहिकांताकटाक्षवीक्षणहावभावादिभिःपु
रुषंरंजयतिव्यजनंव्यापारेणैवसर्वंकार्यंकारयतिएवंकाव्यविद्यापिशब्दार्थतदुभयशक्तिमूलाव्यंजनाद्
व्यासहृदयहृदयानंदिन्यालोकोत्तरचमत्कारकारिण्यारामादिवद्वर्तितव्यंनरावणादिवदितिव्यंजयंतिसर
सतामापाद्यैवपुंसःकर्तव्येप्रवर्तयतिनिवर्तयतिचकर्तव्येकाव्यमुपदेशांतरातिशायितमाननिरर्थकंनापिपंचमः
मूलप्रमाणाभावेपिकाव्यविचारशास्त्रंप्रवृत्यपपत्तेःदृश्यतेहिमूलप्रमाणाभावेपिपदार्थमीमांसात्मकन्यायवै
शेषिकशास्त्रयोःप्रवृत्तिरुपलभ्यतेचपदमामांसायाःतद्वदत्रापिभविष्यतिअथमन्यसेस्वाध्यायोध्येतव्य
इत्याध्ययनविधिःप्रतीयतेतस्यचफलवदर्थावबोधपर्यंततान्यायसिद्धाअर्थावबोधश्चद्विविधःपदा
र्थगोचरोवाक्यार्थगोचरश्चेतिद्विविधोपिविचारःसाध्यःतत्रवाक्यार्थज्ञानस्यपदार्थज्ञानपूर्वकत्वात्तस्यचसाधुप

राधीनत्वात्यदसाधुत्वमीमांसाकर्तव्यताप्यध्ययनविधिनेवापादिताअनंतरंपरस्परव्यावृत्तपदार्थबोधसिध्
येपदार्थविचारात्मकयोन्यायवेशेषिकशास्त्रयो रप्यारंभ स्तेनेवापादितःएवंवाक्यार्थज्ञानाद्यवाक्यार्थमीमां
सशास्त्रारंभोपिनकुत्रापिमूलप्रमाणशून्यतेतिअत्रोच्यतेकांतासंमिततयोपदेशारस्येनकर्तव्याकर्तव्ययोःप्रवृ
निवृत्तिजनकत्वात्काव्यमुपदेशांतरमतिशेतेत्यवोचाम॥ध्वनिप्रधानंकांतासंमिततमितिलक्षणंचावादिष्म
ध्वनयश्चविचारमंतरेणदुर्बोधाइतिकाव्यमीमांसाकर्तव्यताचन्यायसिध्याउपलभ्यंतेचद्यहुतराणिश्रुतिस्मृती
तीहासपुराणेषुपुण्यश्लोकेषुगुणप्रतिपादककाव्यकर्तव्यताप्रतिपादकानिवचनानिपुण्यश्लोकस्यचरितमु
दाहरणमस्येतिकीर्तयेद्यजगन्नाथंवेदंचापिसमीरयेत्कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविना
पशुघ्नात्॥प्रतिष्ठांकाव्यबंधस्ययशसःसरणिंविदुः॥अकीर्तिवर्धनंचैवकुकवित्वविडंबनां॥कीर्तिस्वर्गफ
लामाहुरासंसारंविपश्चितः॥अकीर्तिंतुनिरालोकनरकोद्देशदूतिकां॥तस्मात्कीर्तिंसुपादातुंअकीर्तिंचव्य
पोहतु॥काव्यालंकारशास्त्रार्थःसंपाद्यःकविपुंगवैरित्यादीनि॥अत्रपुराणभारतवचनानांवेदरूपत्वेनप्रा
माण्यंनिर्वादंपुराणंपंचमोवेदः॥भारथःपंचमोवेदइतियोर्वेदलोकेःस्मृतिवचनानांप्रामाण्यंस्मृत्यधिकारणे
निर्णातमेवनुकाव्यालापांश्चवर्जयेदितिस्मृतिबाधितत्वादेतासांस्मृतीनांरागाभिमूलत्वंवर्णनीयं॥तदुक्तंरा
गद्वेषभयदोन्मादप्रमादालस्यलुब्धताःकवानोलेक्षितुंशक्याःस्मृत्यप्रामाण्यहेतवइतिततश्चवेसर्जनीयवासो
ग्रहणस्मृतिवत्प्रामाण्यमितिचेन्मैवंकथंचिदपिप्रामाण्यानिर्वाहेअप्रामाण्यवर्णनंप्रकृतेतुव्यवस्थयाप्रा
माण्यंनिर्वोढुंशक्यते॥तथाहियादिनिषेधस्मृतिःकाव्यमात्रंगोचरयेत्तुरामायणादेरप्युच्छेदस्यादितिन्याया
नुगृहीततयाविशेषवचनानांबलवत्त्वात्तदनुरोधेनसामान्यनिषेधोअसत्काव्यविषयतयाप्रामाण्यमनु
वीतविशेषस्मृतयश्चस्वार्थेनिष्प्रतिपक्षतयानिरंकुशंप्रामाण्यंभरतेनित्यूभयीनांप्रामाण्यंव्यवस्थाप्यतेअ
तोनकश्चिद्दोषःअथैवमपिकाव्यमीमांसायाःमूलभूतप्रत्यक्षश्रुत्यादिनानावेदिकंमन्योभवान्परितुष्यतिय
दितदुपन्यासेनभवंतंपरितोषयिष्यामः तथाहिअर्थ्यनाविधिर्वैदिकपदपदार्थवाक्यार्थमीमांसानांप्रयोज
कइतिहितोक्तंसएवविधिःकाव्यवाक्यमीमांसाप्रयोजकोपिभवतुसंत्येवहिप्रायशोवेदेष्वपिकाव्यलक्ष

णलक्षितानिअदोषाणिसगुणानिसालंकाराणिवाक्यानिगुणालंकाराः वक्ष्यमाणलक्षणाःगुणाःअर्थव्यक्त्या
दयःतेचपदैकस्मिन्यूपइत्यादिवेदवाक्येषुसंभवंतिअलंकाराउपमादयःआतेगर्भायोनिमित्यादिषुउपमा
त्रिगुंशदस्माजघनंयोजनानीत्यादावतिशयोक्तिःप्राणाउपरवाहन्नूधिषवणेइत्यादोरूपकंयस्यायुरंतःप्रद्यु
म्नशेफं॥उपोपमेवपरामर्शाजायेवपत्यउशतीसुवासाःइत्यादिषुशृंगाररसःतेषामसुराणांतिस्रःपुरइत्या
दिषुवीररसःथोवाअस्यपशुमत्तिमागुंसमित्यादोबीभत्सरसःकोमोहःकस्तदाशोकइत्यादोशांतरसःएवमन्ये
पिगुणालंकाररसास्तत्रतत्रद्रष्टव्याःअतस्तदवबोधनार्थंगुणालंकाररसादिप्रतिपादककाव्यमीमांसारंभोध्य
ध्ययनविध्यनुमतएवेतिसंतोष्टव्यमायुष्मताअंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः॥पुराणधर्मशास्त्रं
चविद्याह्येताश्चतुर्दशेतिचतुर्दशस्वविद्यास्थानेषुकाव्यमीमांसायाःआपरिगणनाद्गुणादीयत्वमितिनशंक
नीयं॥तथासतिरामायणादेरपिअनुपादेयताप्रसंगात्॥तस्माद्विषयप्रयोजनसद्भावान्निषेधस्यान्यविष
यत्वान्मूलप्रमाणसद्भावाच्चकाव्यमीमांसाशास्त्रमारंभणीयमितिसर्वमनवद्यं॥इतिश्रीमन्त्रिभुवनपवित्र
हरितसुनिगोत्रावतंसवाराणसीवंशपयोदकरप्रभातभानुनापदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्याय
पर्वतनाथपंडितमंडलेश्वरसूनुनायज्ञमांबागर्भरत्नाकरपारिजातेननिर्मलाचारपूतेनचतुर्दशविद्याभूष
णवताश्रीधर्मसंरक्षावतावितरचितेश्रीमद्रघुकुलतिलकयशोघनसारसारसत्करभाकृतेसाहित्यरत्नाकरनामन्य
लंकारशास्त्रेकाव्यारंभसमर्थनंनामप्रथमःस्तरंगः॥ ॥आस्तामंदिरमिंदिराप्रणयिनोदेवस्यरामात्म
नस्त्वंगतुंगतरंगरिंगणभरैरंगीकृताडंबरः॥तादृङ्निर्मलधर्मसूरिकवितासोल्लासकल्लोलिनीपूर्णःकर्ण
मनोहरोविहरतेसाहित्यरत्नाकरः॥ ॥इतिप्रथमःस्तरंगः॥ ॥अथकृतिनायकेरघुनायकेनायक
गुणानाह॥महाकुलीनत्वमुदारताचतथामहाभाग्यविदग्धभावौ॥तेजस्विताधार्मिकतोज्ज्वलत्वमभीगुणाजा
यंतिनायकस्यमहाकुलीनतायथा॥आवासःकथमस्मदादिवचसांवंशोरघूणांभवेद्यस्यासीत्प्रभवस्त्रिमूर्तित
नुभृद्भानुस्त्रिवेदीमयः॥यस्संभूतभगीरथस्यदुहितागंगाजगत्पावनीयत्रव्यक्तिमुपागतःकिमपरंरामात्मनाश्री
पतिः॥२॥उदारतायथा॥प्रत्यासन्नसुधांशुबिंबमुकुरेसंलक्ष्यमाणाननाश्चंचत्कांचनचूलरत्नखचितप्रासाद

राज्यासनाः॥ कंदर्पोविदुषांस्कंदेंद्रतरुणीसल्लापलीलारसेसंसक्ताः कथमंतिराघवविभोरौदार्यमस्यद्भुतं॥३॥सर्वसर्वं
सहैश्वर्यंमहाभाग्यमुदीर्यते॥यथा॥आचक्रवालवसुधातलचक्रवालंसर्वेनरधिपतयः ससुरासुरेंद्राः॥नीराज
यंतिरघुनंदनपादपीठंकोटीरकोटिघटितस्फुटरत्नदीपैः॥४॥ क्षमावस्तुषुचातुर्यं वैदग्ध्यमभिधीयते॥यथा॥
सीताशोकममर्षदैन्यमसकृन्निर्मेचमंदोदरीकंठेमंगलसूत्रमात्मलघुतामेकेषुणायोलुनात्॥लीलोन्मूलितस
सालवितते:श्वेतातपत्रायुतछेत्तुस्तस्यविदग्धतांविवरणेब्रह्मापिजिह्मायते॥५॥तेजस्वित्वंयथा॥तत्तादृक्
प्रोढदोषाचरतिमिरभरोल्लुंठनाकुंठशक्तेःसर्वत्रोद्भासमाणस्फुरणरघुमणिस्फारतेजःखरांशोः॥तत्तद्ब्रह्मांडभां
डेविमलतरविघन्नीरनीरंध्रगर्भेबिंबाएवस्फुरंतिप्रतिफलिततनोर्नूनमेकेकसूर्याः॥६॥अत्रसकलब्रह्मांडप्र
काशकस्यरघुकुलतिलकप्रतापसूर्यस्यगगनजलपूरितेकेकस्मिन्ब्रह्मांडेप्रतिफलितमूर्तेःप्रतिबिंबएवए
केकसूर्याःसंतस्फुरंतिनतुतदितरेसवितारःसंतीत्यपन्हवालंकारभेदः॥अतिशयोक्तेःरूपकश्लेषाश्वेति
तेषांसंकरः॥धार्मिकत्वंयथा॥ताताज्ञाचरणानुगंगतवतःसंत्यज्यराज्यश्रियंकेकेय्यामविकारिणश्चभर
तादिदेष्वनावर्तिनः॥यातायाहितसोदरायशरणंलंकाश्रियंयछतस्तस्माद्राशरथेःसुरासुरनरेष्वन्योनधन्यो
जनः॥७॥उज्ज्वलत्वंसौंदर्यंयथा॥यत्सौंदर्यमवेक्ष्यजीर्णमुनयोवातांबुपर्णाशनाः॥धैर्येणार्यदृषापसार्यसहज
संत्यज्यलज्जामपि॥संभोगंकिलवज्रिरित्यभिदधेःपौराणिकैस्तत्कथारामस्यकनुकामरूपविभवस्त्रीमात्र
नेत्रश्रियः॥८॥यादितिमिनंपदं॥अथनायकस्वरूपंनिरूप्यते॥कीर्तिप्रतापसंपन्नःपुमर्थत्रयतत्परः॥धुरं
धरश्चगुणवान्नायकःपरिकीर्त्यते॥९॥तत्रप्रतापसंपत्तिःप्रागेवप्रदर्शिता॥कीर्तिसंपत्तिर्यथा॥नग्नस्तस्तम
सानवाह्निमलिनोदर्शनोकर्शितोनेवासंगतिविन्नचांकिततनुर्नेपाक्षिकश्चारपि॥लोकालोकनगेंद्रलंघन
विधौनोपंगुभावंगतोनिर्दोषोगुणसागरोद्रघुपतेर्जातोयशश्चंद्रमाः॥१०॥यथावा॥उद्वेलाद्गुणसागराद्रघुप
तेर्निर्धूतदोषाकरादासील्लोप्यविपल्लवःशुभयशोमंदारभूमीरुहः॥नानाभूधरबीजसागररसान्गर्भेभितोद्भू
तानि व्रत्यांडानिफलानियत्रबहुशःसंश्लिष्यसंजाग्रति॥११॥ वेलाशब्देनकुलकालोविवक्षितो॥तेनोद्वेलपदेन
देशकालनिमंत्रितात्प्रसिद्धसागराद्रामगुणसागरस्यव्यतिरेकोदर्शितः॥निर्धूतदोषाकरादित्यत्रापितथैव॥अवि

पल्लवःवृक्षपक्षेपल्लवव्यतिरेकशून्यः॥कीर्तिपक्षेविपल्लेशनापिरहितः॥नानाभूधराएववीजानिसागराएवरसा
स्तत्रश्लेषरूपकातिशयोक्तीनांसंकरः॥विभ्रतीत्यत्रवानपुंसकस्येतिवैकल्पिकोनुभावः॥सामिकृतोदार्यवर्णना
देवतदुभयसंपत्तिरुक्ता॥तदुभयतुल्यकोटिःकामाद्यर्थसिध्यएव॥धुरंधरत्वंयथा॥आचार्यवान्वरूथिन्यु
रारिरासीदाकल्पवान्शयनवानपिदानवारिः॥दिक्पालकाविदधुरुत्तमयानचर्मादोर्मंडलेरघुपतेर्धरणींदधाने
॥१२॥यथावा॥मृदुचंदनशीतरामबाहाकालिताभूर्विजहौनिवासखेदं॥अतिनिष्ठुरकूर्मरवर्पराग्रेविषमेदूषित
शेषभोगभागे॥१३॥अतिनिष्ठुरविषमेदूषितपदमहिम्नाभूदेवतायाअनुचितस्तल्लाभवस्तानेनमहाननुतापो
ज्ञातइतिवस्तुवस्तुनाधन्यते॥गुणाढ्यत्वंयथा॥शेषाश्चेत्पुरुषास्त्रिविष्टपनुषःसर्वेप्यनाशायुषःसर्वज्ञाश्चचतु
ष्पदीपरिमितांवाचंवदेयुःसदा॥शब्दाश्चक्रमवर्जितायदिसमस्तार्थाभिधानक्षमानाक्रांताश्चविवस्वतारघुपते
स्तत्राप्यगण्यागुणाः॥१४॥अत्रसर्वपदंयावत्पदसंबध्यते॥तरुगुल्मलतादयश्चतुर्मुखांताजीवाःसर्वशब्दार्थः
चतुष्पदीपरिमितामितिवाग्धेनोश्चत्वारिपदानितत्रपदत्रयंप्राणिनोनोऽर्थितुंक्षमंतेतुरीयमेवपदंवदंति॥
अयंचार्थश्चत्वारिवाक्पदपरिमितापदानीत्यादिश्रुतिसिद्धः॥वदेयुरितिसंभावनायांलिङ्॥वदनंसंभावितंचेदित्य
र्थः॥समस्तेतिलक्षणादिदृत्यर्थबोधकत्वेविलंबापत्तिरित्यर्थः॥अत्रापितथापाठ्यर्थः॥अतिशयोक्तयःगणनास्त
मग्रामेलनेपिकार्याजुषतेविशेषोक्तिश्च॥सचातिशयोक्त्यनुप्राणितेतिसंकरः॥सचनायकश्चतुर्विधः॥धीरो
दात्तोधीरोद्धतोधीरशांतोधीरललितश्चेति॥गंभीरःसारसंपन्नःकृपावानविकत्थनः॥परिकीर्यगुणग्राही
धीरोदात्तोनिगद्यते॥गांभीर्यंहर्षामर्षादिव्यंजकविकारशून्यत्वं॥यथा॥राज्यस्थोवावनस्थोभवतिरघुपति
स्तुल्यवक्त्रप्रसादःकेलासोद्धारणादीन्प्रगणयतिगुणानद्भुतान्रावणस्य॥सीताश्लेषाभिलाषिण्यपि
लविपिनेन्यस्तशस्त्रःकृपावान्लज्जासिंधोर्निमज्जत्यवनतवदनःकिंनरेंद्रोपमानः॥चंडोविकत्थनोद्ध
तोबलीधीरोद्धतोमतः॥यथा॥रेरेलंकेशरामांकिमितिमृगयसेतिष्ठमेनिष्ठुरामीप्रोढप्रायातिकायक्षतजरु
सहरेःसम्यगाचम्यपूर्वं॥नीत्वाप्राणाहुतीनांपदमतिकठिनानिंद्रजिल्लाणवायून्कांतुंपार्श्वत्कालेखंडा
चलकवलहृतोव्यग्रभावंभजंति॥१६॥सधीरललितोनेतानिश्चिंतोभोगलंपटः॥यथा॥राज्याभिषेक

हृदयमांस

समनंतरकालमेवरामेणसादरसमर्पितराज्यलक्ष्मीः॥ शत्रुघ्नलक्ष्मणमुखेरुपचर्यमाणः साम्राज्यभोगनिरतो भरतो
बभूव॥१७॥ धीरशांतः शांतिधैर्यदीपोविप्रोनिगद्यते॥ गंगादीनांनदीनाममलिनफुल्लिनेहंससंसेव्यमानेस्नाताः
पूताः प्रशांताः शुभसितभसितन्यस्तशास्त्रत्रिपुंड्राः॥ संतःसंतोषवंतोमहितमहितहृद्यामरामाभिरामंजापंजापं
दुरापंनिलयमकलयन्भासराभूसुरेंद्राः॥१८॥ अत्रशब्दालंकाराणांसंसृष्टिः एतेनायकाः सर्वरससाधारणाः अनुकूलोदक्षिणः शठोधृष्टइतिचत्वारःशृंगारनायकाः॥ एकायत्तोनुकूलःस्यात्॥ यथा॥ धम्मिल्लंदरफुल्ल
हल्लेकदलेरुल्लास्यफालस्थलेकस्तूर्यातिलकंकपोलकुचयोर्निर्मायपत्रांकुरान्॥१९॥ उत्संगेविनिवेश्यभूषणगणैःसीतांस्वयंभूषितांरामः क्रीडतिकामकार्मुकलतामोवीविपंचीरवैः तुल्योनेकत्रदक्षिणः॥ यथा॥ विद्याप्रौढविलासिनीभिरनिशंकंठेगृहीतस्वयंभूदेव्यासततावलंबितभुजोराज्यश्रियारंजितः॥ कांतेःकीर्तिवधूजनैःपरिवृतःसत्कांतिसीमंतिनारत्नैःश्लिष्टतनुर्विदेहतनयामंकेचधत्तेविभुः॥२०॥ नायिकामात्रविज्ञातावेप्रियः शठउच्यते॥ यथा॥ गूढंत्वयानायकगोपितायामृगेक्षणासीन्मुकुरेत्वदीये॥ दृष्टामयासाद्यहिमत्समानाशाद्यंतवज्ञातमभूतपूर्वं॥२१॥ व्यक्तापराधोनिर्भीकोधृष्टइत्यभिधीयते॥ यथा॥ वीरश्रियोवपुषितेपरिभोगचिन्हंसंलक्ष्यतेस्मयमिदंनहिसंवरीतुं॥ सर्वंमयाहिविदितंचरितंत्वदीयंतत्किंप्रतारयसिमांविनयेरलीकैः॥२२॥ एतेषांनायिकानुकूलनेक्रमासीठमर्दविटचेटविदूषकाःसहकारिणः॥ किंचिदूनःपीठमर्दःकलासकुशलोविटः॥ संधानकुशलश्चेटोहास्यप्रायोविदूषकः॥ तत्राद्योयथा॥ श्रीरामभूपतेवचापगुणः स्वनात्माकोप्यद्भुतोजयतिसंयतिपीठमर्दः॥ यः श्रोत्रभूमिगतएवनयस्यराणांराजश्रियस्तवचिरायवशंवदत्वं॥२३॥ इतरेषांतुस्पष्टमुदाहरणं॥ अथाष्टविधाः शृंगारनायकाःनिरूप्यंते॥ स्वाधीनपतिकाद्येकातथावासकसज्जिका॥ विरहोत्कंठिताचैवविप्रलब्धाचखंडिता॥ कलहांतरिताचैवतथाप्रोषितभर्तृका॥
तथाभिसारिणीचेतिनायिकास्त्वष्टधाःस्मृताः॥ स्वाधीनपतिकासाख्याद्यापत्यानित्यलालिता॥ यथा॥ दोलायामधिरोप्यमंदवलनैरांदोलयन्नादरात्केलीकाननमंजुकुंजुललताकुंजेषुसंचारयन्॥ स्वेदांभोधन ६
सारसाररजसांक्षोदेनशांतिंनयन्रामोलालयतेविदेहतनयामुत्संगसंसंगिनीं॥२४॥ केलीगर्हंतथात्मा

नमलंकृत्यस्मरातुरा॥ प्रतीक्षतेयादयितंसास्माहासकसज्जिका॥ केलीसद्मनिसज्जितेस्थितवतीस्वांगंमुहुर्भूषितंपश्यंतीमुकुरेभविष्यतिरतेसंकल्पयंतीक्रमं॥ एष्यंतीदिवसावसानसमयस्यासंन्नभावंमुहुः बालामेभवतः प्रतीक्षणपरामारामजाड्यंकृथाः॥२५॥ विरहेणकृतोत्कंठाविरहोत्कंठितामता॥ यथा॥ हस्तन्यस्तमुखांबुजानवरतंहारेविधत्तेस्थितिंत्वन्मार्गेचलितंसखीजनमपिबामेवसामन्यते॥ २६॥ एकांप्रेषितवत्यपिप्रियसखीमन्यांपुनःप्रेषयत्याहारादिपराञ्जुरवीरघुपतेत्वय्येसावर्तते॥ यथावा॥ कंदर्पोविरहानलेममसखिक्षिप्त्वा चकोरांगनाचंचूरवंडितचारुचंद्रकिरणश्रीखंडकांडछदान्॥ चंचन्नूतनचूतरेणुविकिरैश्चैत्रानिलैःसांप्रतं हंतोद्दीपयतिप्रियोरघुपतिर्नायातिकामेगतिः॥२७॥ प्रियेणवंचिताज्ञेयाविप्रलब्धास्मरातुरा॥ यथा॥ श्वसितमुद्दितमेतत्सद्मसंकेतितंमेशिशिरतिथेहिचंद्रेनत्वहोरामचंद्रः॥ अजनिरजनिकालःसांप्रतंयातयामःस्वभवनमयिसरव्यःसत्वरंयातयामः॥२८॥ अहोइतिखेदे॥ क्वचिन्नीतस्तपेकांतेखंडितेर्ष्याकषायिता॥ यथा॥ ममेवव्यायोगे॥ नीतस्तपःक्वचिदधःकृतजीवनायाःरागान्वितस्त्वहिनबाष्पमुचोनलिन्याः॥ लीनश्रियोविगलितालिगिरोविवस्वान्पुष्णातिपादपतनेनपुनःप्रहर्षैनिरस्यदयितंकोपासश्चात्तापमुपागता॥ कलहांतरितानामकलाविडूरुदाहृता॥ यथा॥ त्राणाःपंचविरिंचिनाममकृतावाणश्चतन्मारणाःपंचैवात्मभुवस्तथापिनभयंतेभ्योममाशंकितं॥ यत्तंप्राणमहंनराघवमयंयत्त्वाग्विनासंस्थिताकोपाद्यविधूयतंस्मरशरग्राहेर्नदुःखेकथं॥२९॥ देशांतरगतेकांतेखिन्नाःप्रोषितभर्तृका॥ यथा॥ रामेगतेत्यसकरविजयंकर्तुकामेवनांतंभूनंदिन्यादिनदाशिकलापांडुरःकांतिपूरः॥ कंदर्पाग्नेर्दधातिवपुषिस्पष्टमंगारभंगीमंगीचक्रेभसितपटलीरोषणादोषमुद्रां॥ असकराःखरादयः॥ अनुरक्ता स्वयंकांतंयातियासाभिसारिका॥ यथा॥ रावणावरजातत्रराघवंमदनातुरा॥ प्रतिपेदेनिदाघार्ताव्यालीवमलयद्रुमं॥३०॥ यथा॥ कोटीतीक्ष्णक्षरक्षतक्षितिरजःस्कारांधकाराकृतेसंयद्रात्रिमुखेकृपार्णतिलकादूतीकृतालंबना॥ शुंडालघुतिडंबरांबरधराश्चेरेकभोगोन्मुखीरात्रौ श्रीरभिसारिकारघुपतेर्बाहुंसमालिंगति॥३१॥ एताश्चमुग्धामध्यप्रगल्भाभेदेनत्रिविधाभवंति॥ तासांचस्वरूपंरसतरंगेनिरूपयिष्यामः॥ ताःपुनःपद्मिन्यादिभेदेनचतुर्विधाः॥

नासांलक्षणंकामशास्त्रेप्रसिध्यतिनेहप्रपंच्यते॥अथेदानीमुक्तगुणविशिष्टस्यनायकस्यकाव्याशरीरनिर्वर्तकं
काव्यंलक्षयिषुर्बीजंहितस्याःकवितालताया:प्राक्चोद्दिदर्शयतिप्रतिभाविशेषं॥सत्का
व्यशास्त्राद्यवबोधनादिजलावसेकादिकमीरयंति॥ ॥प्रांचतिनांचेःपूजायामिल्कपधानकारस्यलोपप्र
तिषेधः॥प्रतिभातिआतःश्वोपसर्गेदृत्यडः॥अकर्तरिचकारकेसंज्ञायांमितिकरणार्थेताप्रतिभालनयेतिप्र
तिभा॥स्मृतिव्यतीतविषयामतिरागामिगोचरा॥बुधिस्तात्कालिकीज्ञेयाप्रज्ञात्रैकाल्यगोचरा॥ ॥प्रज्ञांभ
वनवोन्मेषशालिनींप्रतिभांविदुरितिउक्तलक्षणाप्राचीनजनकृताविशेषसमुत्थादिताशक्तिःयांविनाकवि
तेवनप्रसरेत्प्रस्तावाउपहासनीमास्यात्तस्याविशेषःउद्बोधःतंकवितालताया:बीजंप्रधानकारणंप्रा
च्याःप्राहुः॥काव्यानिरामायणादीनिशास्त्राणिकाणादपाणिनीयादीनिआदिशब्देनगजतुरगरवड्गादिशा
स्त्राणांपरिग्रहः॥तेषामवबोधनंसम्यगर्थपरिछित्तिः॥द्वितीयेनादिशब्देनकाव्यविछित्तयेकाव्यकरण
विचारयोःनिरंतरपरिशीलनंविवक्षते॥अनवरतमभ्यस्यतामेवकवीनांकाव्येषुकेयदर्शनात्एतस्य
र्वतस्याःजलावसेकादिकंप्राहुः॥अत्रादिशब्देनदोहदादिपरिग्रहः॥यथाहि॥क्षितिपाथःपवनहीनांका
रणत्वेपिअंकुरोत्तावात्तरंगत्वात्प्राधान्यंबीजस्यैवप्रतिभाशक्तेरपिकवितोद्यांतरंगत्वात्व्युत्पत्तिमा
द्यविर्भूतदोषनिवारणप्रभविष्णुत्वाच्चप्राधान्यमितिभावः॥अधुनाकाव्यसामान्यलक्षणमाह॥सगुणालं
कृतीकाव्यंपदार्थौदोषवर्जितौ॥गुणादीनांलक्षणानितत्तत्तरंगेषुवक्ष्यामः॥अत्रपदशब्देनपदसंदर्भा
त्मकंवाक्यंलक्ष्यते॥तत्रैवकाव्यलक्षणसंभवात्पदंनविभक्त्यंतंज्ञेयंस्फुटिङन्तमितिपदलक्षणस्य
प्रत्येकसमुदायपक्षयोरव्याप्त्यसंभवदोषग्रस्तत्वात्॥पदंविभजते॥वाचकंलक्ष्यकंचैवव्यंजकंचे
तितत्त्रिधा॥आद्यंलक्षयति॥साक्षात्संकेतितार्थस्यबोधकंतेषुवाचकं॥संकेतितःगृहीतसंबंधइत्य
र्थः॥ननुकोयंशब्दार्थयोःसंबंधःनतावत्तादात्म्यंविलक्षणतयाप्रतीतेः॥नापिकार्यकारणभावःशब्द
स्यनित्यत्वेगगनकार्यत्वेवास्वार्थेनसहकार्यकारणभावाभावात्॥नापिदेशकालाविनाभावःभिन्नदेशा
कालत्वात्॥नापिसंयोगः॥शब्दस्यद्रव्यत्वेगुणत्वेवाक्यार्थेनगुणेनद्रव्येणचातद्योगात्॥नाप्यर्थस्य

तिजननशक्तिरेवसंबंधः॥अगृहीतस्यतस्यकार्यानुपपत्तेः॥अन्यथाअत्यासन्नस्यापिशब्दार्थस्यतीतिप्र
संगात्॥ग्रहणापेक्षायांस्वजन्यार्थस्मृत्यैवस्वानुमानादन्योन्याश्रयप्रसंगात्॥नचपूर्वपूर्वस्मृत्यातदनु
मानादुत्तरोत्तरस्मृतिजन्मानवस्थाप्रसंगात्॥किंचयत्रसंबंधिदर्शनात्संबंध्यंतरस्मृतिः॥तत्रसादृश्यक
र्मकारणभावादिरेवसंबंधोनियतएव॥सचप्रकृतेनास्ति॥तस्मान्नशब्दार्थयोःसंबंधइति॥अत्रोच्यते॥
अस्तुशक्तिरेवसंबंधः॥सचसंगतिग्रहणकालएवगृह्यते॥तज्जनितसंस्कारः॥शब्ददर्शनसमुद्बुध्यःस
तामानेणअर्थस्मृतिंविरोचनादिरेवजनयतिनतत्रार्थप्रतियोगिकसंबंधविशिष्टशब्दज्ञानमर्थस्मृतिहेतुरभ्यु
पगम्यते॥तथासतिसंबंधस्यापिकर्णकोटिनिवेशनेनसंबंधातराभ्युपगमप्रसंगात्अर्थस्यापिसंबंधविशे
षणतयाप्रथममवगतत्वेनपुनस्तदवगमायशब्दवैय्यर्थ्यप्रसंगाच्चयत्कृतमन्यत्रसादृश्यादिरेवसंबंधइति
तत्रवक्तव्यं॥शब्दार्थयोरपिसादृश्यादिनाभाव्यमितिविवक्षितंउतशब्दार्थवदन्यत्रापितन्माभूदितिकिंवा
तदभावात्प्रकृतेपिस्मृत्यभावइतिनाद्यः शब्दार्थयोस्तदसंभवात्नाद्वितीयःअन्वयव्यतिरेकसिध्यत्वात्त
तीयेपिशक्तिसंबंधमंगीकृत्यस्मृत्यभावआपाद्यतेउत॥संबंधएवनास्तीतिनाद्वितीयः॥कार्यगम्यत्वाच्च॥स्मृ
तिजननशक्तिरस्तिस्मृतिर्नोत्पद्यतेतिव्याघातात्॥तस्माच्छक्तिसंबंधइत्यनवद्यं॥वाच्यमुद्देशेनवाचकभेदंविवक्षुर्व
च्यभेदमाह॥जातिर्गुणःक्रियाद्रव्यंसांकेत्यंजातिरेवा॥तत्रतावत्सत्येवास्यशब्दस्यायमर्थइतिसमयग्रहेशब्दा
दर्थविशेषप्रतिपत्तिःअन्यथानेत्यन्वयव्यतिरेकाभ्यांसंकेतग्रहसहकृतएवशब्दार्थबोधयतीतिसर्वंसंप्रति
पन्नं॥संकेतग्रहश्चजातिगुणक्रियाद्रव्येषुवाजातावेववाजात्यालिंगितव्यक्तौवाऽन्यापोहेवामतभेदेनभव
ति॥ननुव्यक्तीनामर्थक्रियाकारित्वात्तत्रैवसंकेतःकिन्नस्यादितिचेत्तत्रपृच्छामः॥किंसर्वासुव्यक्तिषुउतैकदे
शे॥नाद्यः॥आनंत्यात्॥नेतरः इतरव्यक्तेरगोव्यवहारदर्शनेनव्यभिचारात्॥किंच॥व्यक्तिसंकेतपक्षेगोःशु
क्लश्वलोडिथइत्यर्थभेदेनपर्यायत्वप्रसंगः॥यातुव्यक्तिःस्वसमानव्यक्त्यंतरबाहुल्यरहितायथाआकाश
व्यक्तिःसादृशीव्यक्तिरेवशब्दार्थोस्तुआनंत्यव्यभिचारदोषाभावात्इतरास्तुव्यक्तयोजात्यालिंगितारए
वशब्दार्थाःकेवलजातेरर्थक्रियाशून्यतयापुरुषप्रवृत्तियोग्यत्वाभावात्केवलव्यक्तेरानंत्यव्यभिचारादि

दोषग्रस्तत्वाच्च प्रत्येकमसंकेतार्हत्वेपिमिलितयोः प्रवृत्तिनिमित्तत्वमुपपद्यतेऽतः कार्त्स्न्येनाविशिष्टस्येव शब्दार्थत्वेप्रामाणिकगोरवमपिनदोषमावहति ततोजात्यालिंगिताव्यक्तिः शब्दार्थइतिनैय्यायिकाः प्राहुः बाह्याः पुनः क्षणिकत्वात्सर्वस्यसामान्यस्यापिकल्पमानस्यतत्त्वात्तेनअन्यापोहः शब्दसंकेतनिकेतनमित्याहुः शाब्दिकास्तुजात्यादिचतुष्टयमपियथायथंप्रवृत्तिनिमित्तमाचक्षतेऽतएवंचभाष्यकारैः गोष्वेकुशःश्वलोडित्थइतिचतुष्टयीशब्दानांप्रवृत्तिरितितत्रगवादयः शब्दाजातिवाचकाः जातिर्नामाभिन्नेष्वनुगतबुध्याआलंबनभूतः तत्प्रमाणकोवस्तुनः प्राणप्रोधर्मउक्तंहिवाक्यपदीयेगोः स्वरूपेणनगोः नाप्यगोः गोत्वामिसंबंधात्तुगौरितिशुक्लादयः शब्दागुणवाचकाः गुणोनामलब्धसत्ताकस्यविशेषाधायकोरूपादिधर्मः चलादयः शब्दाः क्रियावाचकाः क्रियानामपूर्वापरीभूतावयवोधर्मः डित्थादयः शब्दाद्रव्यवाचकाः द्रव्यंनामवस्त्वायदिछयाडित्थादिपदेषुउपाधित्वेननिवेशितंडित्थादिशब्दानामंत्यवर्णबुध्यनिग्राह्यंसंहतक्रमस्वरूपंनचानंत्यमिचारमियाव्यक्तिसंकेतंविहायजात्यादेसंकेतःस्वीकृतः तत्रजातेरनुद्देवेपिगुणक्रियायदृच्छाशब्दानांअनुवृत्तबाधाभावात्सदोषस्तदवस्थइतिचेत्मैवंगुणादीनामप्येकैकत्वांगीकारात्शुक्लिस्फटिकादिषुशुक्लगुणभेदेनप्रतीतिर्भ्रांतिरेवदृश्यतेहिबहुतरंगेषुप्रतिबिंबितस्यैरेकस्यापितत्तदाश्रयभेदेनभेदाध्यारोपः तदेवंजात्यादिचतुष्टमपियथायथंप्रवृत्तिनिमित्तमितिस्थितं अन्येपुनरूक्तपक्षेषुपरितुष्यंतः सर्वत्रापिजातिरेवप्रवृत्तिनिमित्तमितिमन्यंतेऽपरितोषश्चेत्थंनतावज्जात्यादिचतुष्टयंयथायथंप्रवृत्तिनिमित्तंद्वैविध्यापत्तेः एकस्याएकजातेः प्रवृत्तिनिमित्तत्वेसंभवतियद्वैविध्याभ्युपगमायोगात्तथाचगवादिशब्दानांगोत्वादेसंकेतः शुक्लादीनांतुशुक्लत्वादेरुपाध्यादीनांतुपाकत्वादेर्डित्थादीनांचवैशेषिकादिमतेनाकूरहः शरीरभेदसिध्येत्तत्रापिडित्थत्वादावाचेतियुक्तायदुक्तं बाह्यैः सर्वस्यक्षणिकत्वात्सामान्यस्यापिकल्पमानस्यतथात्वादन्यापोहः शब्दार्थइतितदसत्।।सर्वस्यक्षणिकत्वामानाभावात्प्रत्यभिज्ञयास्थायित्वसिध्येत्तच्चनचान्यापोहस्यशब्दार्थताघटप्रतीतेरतदपोहरूपाघटप्रतीतिः तत्प्रतीतेश्चतदपोहरूपघटप्रतीतिरितिपरस्पराश्रयत्वप्रसंगात्यदप्युक्तंनैय्यायिकैः।।जात्यालिंगिताव्यक्तिः शब्दार्थइतितत्रब्रूमः सर्वोहिधर्मोप्रातिस्विकेनसामान्येनवाकेनाविशेषधर्मेणघटितोवेद्यतेगोव्यक्तिश्चनगोशब्दात्प्रातिस्विकधर्मघटितप्रतीयतेनाहिप्रत्यक्षेणैवअन्योन्यविलक्षणज्ञानंशब्दाद्भवतिकिंवाकृतिधर्मकृतेवततश्चविशेष्यंनाभिधागच्छेत्सीणशक्तिर्विशेषणेऽतिन्यायेनविशेषणभूताजातिरेवशब्दार्थः नचजातेरुपलक्षणत्वंशक्यंधर्मिणिधर्मांतरव्यावृत्ततयाप्रतीतेधर्मांतरंप्रतीयमानमुपलक्षणंयद्भवेत्प्रतीतेकाकः इहतुनशब्दाद्व्यक्तेधर्मांतरेणव्यावृत्ततयाप्रतीतिः किंवाकृतिधर्मकतयैवेत्याकृतिर्विशेषणमेवनतुकायोन्वयोव्यक्तिमात्रस्येतिसैवशब्दार्थइतिचेन्नआकृतिधर्मकेवव्यक्तिरन्वयिनीत्याकृतावेवान्वयधीनत्वाकृतेर्निर्व्यापारायानाश्रयासाधनत्वयोग्यतेतिनशब्दार्थतैवाच्यंनहिकारकत्वंव्यापारवत्त्वनियतव्यापारोत्पादेव्यापारांतराभ्युपगमेनवस्त्वापत्तेः किंतुनियतपूर्ववृत्तित्वानियततज्ज्ञातावस्थेवस्तुधर्मोहिव्यक्त्याकृतेर्यासाध्यतइतिधीद्वारास्तिसाधनत्वमाकृतेः कथंपुनराकृतिव्यक्तेरेकधीवेद्यत्वेप्याकृतेरेवशब्दार्थतानव्यक्तेरितिनउक्तोत्तरत्वात्शब्दाच्चैकधीराकृतिधर्मेणैवजायतेनप्रातिस्विकेनधर्मांतरेणअस्यास्फूर्तिरिल्युक्तमेवनन्वेतदयुक्तंकिमाकृतिप्रतीताहेतुरुताप्रतीतानाद्यः धीभेदापत्तेः नाद्वितीयः हेतुत्वासंभवात्तथाशब्दधीर्विषयत्वमपिकथंव्यक्तेः अन्यव्यावृत्तविशेषरूपाहिव्यक्तिः नचशब्दात्तथाप्रतीतिरितिचेन्मैवंनेद्यज्ञाताज्ञातावाआकृतिर्व्यक्तिधीहेतुः किंतुज्ञायमानावस्तुबहिर्विधाहिलोकेपदार्थाः स्वतंत्राः परतंत्राश्चेतिअत्रस्वतंत्राणांज्ञातानामेवहेतुत्वंपरतंत्राणांज्ञायमानतयैवतत्राकृतेः प्रातिस्विकंरूपंपरतंत्रत्वंतच्छब्दास्फुरदंतर्भावताधर्मीभूतव्यक्तिकमेवस्फुरतिनान्यथाअतोनधीभेदापत्तेः व्यक्तेः शब्दधीविषयत्वंचसिध्यदेवमेवापर्यवसानमपियदंतर्भावितधर्मिकातधर्मधीरितिअतएवसेषादनुमानादर्थापत्तेर्वाव्यक्तिधीरितिनिरस्तंनन्वेवंव्यक्तेरपिशब्दजन्यधीविषयत्वेतस्यामपिशब्दशक्तिरितिवाच्यतापातीतिचेत्मैवंयस्मादेवमाकृतिधर्मस्वभावादेवव्यक्तंतर्भावः तस्मादेषात्रगवादिशब्दविषयेयस्यांस्फूर्तौशक्तिः कल्प्यतेतत्रसाध्यशाआकृतिरेकोंशः व्यक्तिरन्यः तत्रानन्यलभ्याकृत्यंशस्फूर्तौशब्दशक्तिकल्पनेव्यक्त्यंशस्फूर्तेरंतर्भावोवर्जनीयतयाभवतिअनन्यलभ्यविषयत्वाच्छब्दशक्तिकल्पनायाः एवंचव्यक्त्यंशोकारणकस्मादितिचोद्यंनिरस्तंनांतरीयकस्यपृथक्कारणापेक्षाभावात्अतएवनाविशिष्टस्यवाच्यताशक्तिकल्पनागौरवाय।। नचशाब्दमतवदुभयापेक्षयाउभयार्थविषयत्वस्वी

कारःशक्तेरनन्यलभ्यविषयत्वादेवेतिसर्वमवदातंतदेवंमतभेदेनजात्यालिंगितव्यक्तेर्वाजात्यादिचतुष्टय
स्यवाजातेरेववासंकेतानकेतनत्वेसिध्यवाच्यस्यार्थस्यचतुर्विधत्वमेकविधत्वमेववाव्यवतिष्ठतेतद्वाचकः
शब्दोपितथैवव्यवस्थितोपिभवतिअभिधांलक्षयतिमुख्यार्थंगोचरातस्यव्याकृतिःकथ्यतेभिधा॥तस्य
वाचकस्यइंद्रियाणामिवशाब्दस्यापिपदार्थप्रतीतिजननानुगुणःपरिस्पंदपरिणामाविलक्षणोव्यापारोंगी
करणीयःसचकोष्टगत्यादिवार्यमाणःसंगतिप्रतिसंधानात्मकोबुद्धिविशेषएवसचात्मनिष्ठोपिशाब्दधर्मत्वे
नव्यवह्रियतइतिप्राञ्चःसाह्विधारूढिपूर्विकायोगपूर्विकाचेतितत्राद्यायआश्रीरामचंद्रभवतश्चरणारविंदे
रेणुंकथंमधुचमुक्तिपदंवदंति॥यद्रेणुनामुनिभिःरवापकलत्रबंधंरत्नाकरोपिमकरंदरसेरविंदत्॥३२॥अ
त्रसर्वेशब्दाःरूढाःद्वितीयाकथा॥काकुस्थकार्मुकांकोदेशरत्नार्पणिनादिने॥नृत्यंतःऋतुभुजोकलापि
नइवोन्मुखाः॥३३॥अत्रसर्वेयौगिकाः॥इतिश्रीमान्त्रिभुवनपवित्रहरितसगोत्रावतंसवाराणसीवंशपयोद
प्राभातभानुनापदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायपर्वनाथपंडितमंडलेश्वरस्रुनायलु
मांबागर्भरत्नाकरपारिजातेननिर्मलाचारपूतेनचतुर्दशविद्याविभूषणवताश्रीधर्मसंज्ञावताविरचितेश्री
मद्रघुकुलतिलकयशोधनसारस्करभीकृतेसाहित्यरत्नाकरनामन्यलंकारशास्त्रेवाचकशब्दार्थनिरूपणं
नामद्वितीयस्तरंगः॥२॥आस्तामंदिरामिंदिराप्रणयिनोदेवस्यरामात्मनस्त्वंगतुंगतरंगरिंगणभरैरंगीकृ
ताडंबरः॥तादृङ्निर्मलधर्मसूरिकविताकल्लोलिनीवल्लुनेःपूर्णःकर्णमनोहरोविहरतेसाहित्यरत्नाकरः॥१॥
एवंवाच्यवाचकतद्वृत्तीर्निरूप्यसंप्रतितन्मूलकतयालक्ष्यलक्षकतद्वृत्तीर्निरूपयितुमर्थज्ञानस्यशब्दज्ञा
नपूर्वकत्वात्पूर्वंशब्दंनिरूपयति॥सोर्थोलक्षणयाशब्दोबोधयेल्लक्षकोत्रसौ॥लक्षणयाप्रतिपादकः
शब्दोलाक्षणिकइतिलक्षणार्थःलक्षणयेतिवाचकादिव्यावृत्तिः॥ननुकेयंलक्षणयद्योगाच्छब्दस्यलाक्ष
णिकतेत्यपेक्षायांलक्षणायाःसामान्यलक्षणमाह॥वाच्यार्थबाधेतद्योगेरूढितोवाप्रयोजनात्॥ययान्यं
बोधयेच्छब्दोव्यापृत्तासास्यलक्षणा॥अन्यमर्थंअस्यशब्दस्यमुख्यार्थबाधःसंबंधःप्रसिद्धिप्रयोजन
योरन्यतरत्॥चलक्षणाप्रयोजकानीत्यर्थः॥ननुकिंशब्दस्यलक्षणत्वंअर्थस्यवा॥नाद्यःतस्यस्वार्थप्रका

शनमात्रेणोपरतव्यापारस्यपुनर्व्यापारांतरायोगात्॥नद्वितीयःअर्थस्यलक्षकत्वेशब्दव्यापारोलक्षणेत्यंगीका
राविरोधादितिचेदुच्यतेवाच्यार्थव्यापारएवलक्षणावाचकेसमारोप्यतेनचशब्दव्यापारांतंगीकारविरोधःअ
रोपितःशब्दव्यापारोलक्षणेत्यभ्युपगमात्॥नन्वर्थस्यैवलक्षकत्वेकथमजहत्स्वार्थायांस्वार्थांशोद्यन्विरोधा
भावः॥केवलसमुदायभेदेनलक्ष्यलक्षकभेदसद्भावादित्यवेहि॥नन्वर्थधर्मस्यशब्दाध्यारोपेकिन्निमित्तमि
तिचेत्शब्दप्रतिपादितस्यैवार्थस्यलक्षकत्वादितिवदामःनाहिशब्दव्यापारसंस्पर्शमंतरेणअर्थांतरंलक्षयि
तुमीष्टे॥अन्यथाप्रमाणांतरोपनीतानामर्थानांलक्षकत्वप्रसंगात्॥अतोर्थव्यापारोपिशाब्दमाहुस्तात्पर्या
ख्यशब्दव्यापारइत्यकथ्यते॥अतएवनांतरार्थनिष्ठःशब्दव्यापारोलक्षणेत्याश्रीयते॥वाच्यार्थइत्यनेनवाच्या
र्थस्वीकारेवाक्यप्रमाण्यानुपपत्तिर्वक्ष्यते॥नतुवाच्यस्यवाच्येनवाक्यार्थेनसंबंधानुपपत्तेःनापिमुख्या
र्थस्वीकारेप्रत्यक्षादिप्रमाणविरोधोवाविवक्ष्यते॥अतएवतदुभयविवक्षयाप्रवृत्तंकैश्चिदुक्तलक्षणद्वयम
व्याप्तिदूषितं॥तथाहि॥वाच्यस्यार्थस्यवाक्यार्थेसंबंधानुपपत्तितःतत्संबंधवशात्प्राप्तस्यान्वयालक्षणो
च्यतइतियल्लक्षणंतदप्यव्यापकंनाहिविषंभुंक्ष्वेत्यादावपितल्लक्षणमस्ति॥सर्वेषांपदानांलक्षकत्वेनवा
च्यार्थाभावात्॥यदपिमानांतरविरोधेतुमुख्यार्थस्यपरिग्रहेमुख्यार्थेनाविनाभूतेप्रतीतिर्लक्षणोच्यत
इतिलक्षणालक्षणंतदप्यव्यापकंकुंडपायिनामयनेमासमग्निहोत्रंजुहोतीत्येतल्लक्षणाव्यापकत्वात्तथा
हि॥यावज्जीवमग्निहोत्रंजुहोतीत्यत्रअग्निहोत्रपदस्थानेत्यग्निहोत्रनामत्वंतल्लक्षकरणेनसिध्यं॥अयं
चाग्निहोत्रशब्दःकर्मांतरेनित्याग्निहोत्रसाधर्म्यात्साध्यवसानलक्षणयाप्रवर्ततइतिप्रकरणांतरप्रयोज
कान्यत्वमित्यत्रनिर्णेतंनह्यत्रमानांतरविरोधःतदर्थस्यप्रत्यक्षाद्यगोचरत्वात्तस्मान्मुख्यार्थपरिग्रहेवाक्य
प्रामाण्यानुपपत्तिरेवलक्षणाबीजंउक्तंहि॥वाक्यप्रामाण्यभंगस्यास्वाभिधेयपरेपदेलक्षणातत्रावि
वाक्येलौकिकवैदिकइति॥अस्तिगंगायांघोषःप्रतिवसति॥आदित्योयूपइत्यादिलौकिकवैदिकवाक्येषु
मुख्यार्थमात्रपरत्वेवाक्यप्रामाण्यानुपपत्तिः॥यद्यपितत्रवाच्यार्थान्वयानुपपत्तिरप्यस्तितथापिलोकेस्व
र्गपुष्पांदृष्ट्वा॥इत्यादोपदार्थानामन्वयसंभवेपिनिष्प्रयोजनेतात्पर्यासंभवेनवाक्यप्रामाण्यानुपपत्तेःप्रती

यमानवाक्यार्थोहिलासकराजतंसंपदोहेतुरितिध्वनिनास्रज्यतेवेदेचवायुर्वैक्षेपिष्ठेत्यादौसंभवत्येववाच्यार्थान्व
येनेरथंक्यवशेनदेवताप्रत्यास्त्यलक्षणयाकर्मणःप्रत्यास्मंलक्ष्यतइत्यर्थेवादाधिकरणेनिरूपितं॥ तस्माद्वाक्य
प्रामाण्यानुपपत्तिरेवलक्षणाक्षेपिकेतिस्थितंतद्योगइतियोगशब्देनसंबंधमात्रंविवक्षितं।प्रयोजनंचयत्रासं
भवंतत्रतत्रद्रष्टव्यंअत्ररूढितोवाप्रयोजनादेर्लक्षणाविभागपरिज्ञानंलक्षणंपरमितिज्ञेयंतत्ररूढिलस
णायथा॥ प्रवीणोभवतोरामरूपाणोयुधियान्निजं॥ कोशंचर्ममयंहित्वागृह्णाद्रत्नमयंहिषां॥अत्रप्रवीणइत्यत्र
वीणाप्रकर्षस्यत्रकृतानुपयोगाद्रूढितःप्रसिद्धेरवनिपुणत्वेलक्षणाश्रीयतेप्रयोजनलक्षणातुप्रथमंमुख्यासा
रोपासाध्यवसानाज्ञेतित्रिधा॥ तत्राद्याजहत्स्वार्थाअजहत्स्वार्थाजहदजहत्स्वार्थाचेतित्रिधा।इतरेतुप्रत्ये
कंगौणीशुद्धाचेतिद्विविधेइतिफलतोलक्षणास्सप्तविधोतिविभागंसिध्यवत्कृत्यक्रमेणतासांलक्षणोदाहरणेदर्श
यन्नादोजहत्स्वार्थांलक्षयति।स्वार्थंहित्वापरोक्तिर्भवेज्जहत्स्वार्थातदाभवेत्॥ यथागंगादिशब्दःपरस्यतटादेः
घोषाधिकरणत्वसिध्यर्थेस्वार्थंहित्वात्मानंतदाद्यर्थेसमर्पयतितदास्वार्थत्यागाज्जहत्स्वार्थान्वर्थसंज्ञेत्यर्थः
यथाग्रामास्तल्यः स्वरहिताः क्रुद्धताः सदेवश्राव्याश्वमध्यमयुताभरतेनदत्ताः॥रामेणतूत्तनधनाः शातशोमहा
र्हाः प्रेक्ष्याश्वपात्रवशगानिहितानदीषुभरतेनसंगतशास्त्रप्रवर्तकेनग्रामाःस्वरसंदोहात्मकाः।तथास्वरा
णांसंदोहोग्रामइत्यभिधीयते॥ इत्युक्तत्वात्। दत्ताः शोधिताः देपूशोधनेइतिधातोरूपं।अत्रशब्दश्लेषमाहिम्ना
भितेनराजाविशेषेणजनपदाविशेषातितीर्णाइत्यपिध्वन्यते।तेचत्रयएवषड्जग्रामस्तथैवेकोमध्यमग्रा
मएवच॥ गांधारग्रामइत्येतत्ग्रामत्रयमुदाहृतमित्युक्तत्वात्नापरिमिताइत्यपिध्वन्यते। स्वरहिताःस्वरे
र्निषादादिभिःसंघीभूतैःहिताःप्रियाइतिस्वरूपकथनंस्वेधनेरहिताइतिस्वरूपकथनंनिंदाचव्यज्यते। क्रु
द्धताःक्वापिधृताःस्वराणामभिव्यक्तिमात्रशरीरकत्वान्नैकत्रधृताइतिस्वभावोक्तिः।यत्रकुत्रचनदेशेसं
प्रदानेनिहिताइतिनिंदाचव्यज्यते। सदैवश्रव्याःनित्यंश्रोत्रग्राह्याइतिस्वभावोक्तिः॥ अन्यत्रग्रामादत्ताइति
नित्यंवाद्यमात्रासिध्याःनतुदर्शनयोग्याइतिव्यज्यते।किंच।मध्यमयुताःमध्यमग्रामेणसंगताःअन्यत्र
नत्रमोप्युत्कृष्टाइतिभावः॥ एवंभरतदत्तग्रामेभ्योरामदत्तग्रामाणामतिशयउत्तरार्धेप्रतिपादितः॥ स्फुट

एवअतएवात्रशब्दार्थश्लेषप्रतिबोधोत्थापिताअतिशयोक्त्यनुप्राणितोव्यतिरेकालंकारः।अत्रनदीनांस्रोतो
रूपाणांग्रामाधिकरणतानसंभवतीतिनदीशब्दस्तस्मिन्मुख्यार्थेगृहीतेवाक्यप्रामाण्यभंगोमंत्रस्तुकाधिकतरशे
त्स्यपावनत्वादिद्योतनायतत्संबंधिनितीरेस्वात्मानमर्पयती।तैंअजहत्स्वार्था। इत्थमप्रस्तुतप्रशंसादेरलंकारस्य
मूलंसामान्यविशेषकार्यकारणसरूपाणामन्यतमस्याप्रस्तुतस्यकथनातेषामेवान्यतमस्यप्रतियोगिनः
प्रस्तुतस्यगम्यत्वेद्यप्रस्तुतप्रशंसातत्राप्रस्तुतस्यअप्रस्तुतत्वादेवकथनमनुपपन्नंसत्स्वार्थत्यागेनप्रस्तु
तमाक्षिपतीतियुक्तमस्याजहल्लक्षणामूलतंयदापुनःस्वाभिधेयविपरीतमर्थंलक्षयति।तदाजहत्स्वा
र्थैव।विपरीतलक्षणेत्युच्यते।यथारामःक्रूरक्रूरदुरासददुर्गवतीदैत्यःपरार्थचतुरंगचमूसमूहः॥ जघ्नु
र्यंवदविभीषणरावणेनस्थानच्युतेनमनुजेनपदातिनाच॥३॥ इदमिंद्रजिद्वचनंअभिधेयविपरीतार्थल
क्षयति॥रामरावणयोर्मुख्यार्थासंभवोनुपपत्तिः।विरोधःसंबंधःरामक्रूजयत्वंरावणस्यदुर्जयत्वंप्रयो
जनंइत्यंतुव्याजस्तुतेर्बीजं॥यत्रवाच्ययानिंदयास्तुतिः॥स्तुत्यावानिंदागम्यतेसाहिव्याजस्तुतिःतत्रवि
परीतार्थप्रतिपत्तिर्विरूढलक्षणामूलेव॥अजहत्स्वार्थांलक्षयति॥शब्दःस्वार्थक्रियासिध्येस्वार्थांत्यागे
नलक्षयेत्॥अर्थांतरंस्वार्थयुतमजहत्स्वार्थिकाभवेत्॥ यत्रशब्देनस्वार्थगतक्रियासिध्येस्वार्थापरि
त्यागेनैवतद्विशिष्टमर्थांतरंलक्ष्यते॥ यथा॥ कुंताःप्रविशंतीत्यत्रकुंतप्रवेशायतद्धंतःपुरुषाःसाअजहद्
स्वार्थालक्षणेत्यर्थः॥ यथा॥ दयादाक्षिण्यदाक्षत्वधैर्यधर्मादयोगुणाः॥ विशंतिभवतोरामक्षुधर्मासन्नि
धांसभां॥अत्रदयादिगुणानांस्वतःसभाप्रवेशासंभवात्॥तत्सिध्यैदयादिशब्दाःस्वार्थोपादानेनैवतत्संब
धिनःपुरुषान्लक्षयंति॥नचस्वार्थापरित्यागेतत्रशब्दस्याभिधा।अंशांतरेलक्षणाचेति॥एकस्यशब्द
स्यैकदैवद्वित्वेहापत्तेरिति॥वाच्यं॥अत्रापिस्वार्थंहित्वैवस्वार्थविशिष्टेअर्थांतरेरूढिन्यायेनलक्षणास्वी
कारात्॥ हंततर्ह्यजहत्स्वार्थताकथमितिचेत्नह्यभिधात्यागमात्रेणस्वार्थत्यागः॥गंगायांघोषइत्यत्र
[illegible]
भासदामुत्कर्षद्योतनंभोजनं॥ इयमजहल्लक्षणासमासोक्त्यादेवीजं॥ प्रस्तुतविशेषणसाम्यादप्रस्तु

तस्यागम्यत्वेहिसमासोक्तिः॥अत्रप्रस्कृतसरूपानुपमर्दनेनेवविशेषणमहिम्नाप्रस्कृताक्षेपात्अनयोर्जहदजहल्लक्षणा
र्थलक्षणयोर्लक्षणलक्षणाउपादानलक्षणेतिसंज्ञाविनिवेश्यव्याचजहारकाव्यप्रकाशकारः॥जहदजहल्लक्षणां
लक्षयतिअंशाभेदमुपादायजहातिनजहातिच॥शब्दःस्वार्थंयादृजहदजहत्स्वार्थलक्षणा॥यथा॥समुद्रकन्या
समुपासितोयोवेकुंठलोकेवसतिंवितेने॥सोयंहरिःसंप्रतिरामनामासीतासमेतोधिवसत्ययोध्यां॥४॥अत्र॥
यद्देशकालवैशिष्ट्यंहरेःपूर्वमभूत्तद्देशकालवैशिष्ट्यमधुनानास्तीतिसोयमित्यत्र॥तत्रांशेस्वार्थंजहातिद्
दतांशेतुनजहातीतायंजहदजहत्स्वार्थलक्षणानन्वेवंसतीमंलक्षणापदद्वयधर्मइत्यकृतंस्यात्॥तदसाधु॥
अभिधावत्तस्याअप्येकपदधर्मत्वेनपदसंघातधर्मतयाकाव्यदर्शनात्॥अतएवकाव्यप्रकाशकारोपिनै
नामुदाजहारनाप्यन्यःपरिक्षकइतिह्येयंसंभवतीतिचेत्॥तत्रब्रूमः॥किमिहलक्षणेवनास्तीतिविवक्षयापरे
णनोदाहृतास्तत्प्युक्तविधाद्वयएवांतर्भवतीतिवा॥नाद्यः॥विचारासहत्वात्तथाहि॥यावताशब्देनयावान
र्थः प्रतीयतेतावानेवतस्यार्थोनन्यूनोनाधिकश्चेतिस्थितिः सोयंदेवदत्तइत्यत्रतत्रेदंताविशिष्टंदेवदत्तस्वरू
पमवभासतइतितावदेवअर्थः तत्रतदांशबाधेन्यूनमिदमःस्वार्थेतिकथमनेनाविधायेतप्रतीयमानंचत
द्यथाकथाचनदृत्याप्रतिपादनीयंतेनतत्रोपलक्षितमिदंताघटितमेवदेवदत्तस्वरूपमभिधाकुंठनाल्लक्षणा
याबोध्यमित्यकामेनाप्यभ्युपगंतव्यमेवेतिकथमत्रनास्तिलक्षणा॥नापिद्वितीयः नतावदियंजहत्स्वार्थाद्
यंहितदांशमात्रमेवजहातिनतुलक्षणलक्षणावत्पदार्थस्वार्थसकलमपिसमर्पयतिसाप्यजहत्स्वार्थास्वसि
द्धयेपरापेक्षाभावात्किंतुस्वार्थस्यैवांशभेदेनहानाहानाभ्यामुभयवैलक्षिण्यात्कोदृयंतरमित्यन्यदेवेयंज
हदजहल्लक्षणादृश्यतेचलोकवेदयोरर्थमंतर्वेद्यर्थंवाहेवींदिवेमंभुंक्तेत्यादोपदसंघातलक्षणाश्लवा
दिनश्चेतामेवोपजीव्यमक्षवाक्यार्थंव्यवस्थापयंति॥इत्यंस्कविशेषः॥आलंकारिकास्तावत्तदांशस्येदानीम
संभवात्तस्यैवहानंइदंतांशस्येदानींसंभवादहानमितिजहदजहत्स्वार्थामाचक्षते॥वेदांतिनस्तुदृष्टांतदार्ष्टांति
कयोरेकरूप्यायसोयंदेवदत्तइत्यत्रापितत्तेदंतांशयोरन्योन्यविरुद्धयोर्द्वयोरपित्यागेनअविरुद्धस्वरूपमा ११
त्रापरित्यागेनचद्वयोपलक्षितंस्वरूपमात्रंलक्ष्यतइतिजहदजहत्स्वार्थांश्युत्पाद्यतत्त्वमसीत्यादिमहावा

क्येपितत्पदार्थगतविरुद्धांशत्यागेनअविरुद्धचिन्मात्रोपादानेनचउभयोपलक्षितमेकमखंडंवस्तुभाग
त्यागलक्षणयाप्रतिपाद्यतइतिवर्ण्यंते॥नन्वालंकारिकोक्तमार्गेणपूर्वकालोपलक्षितस्येतत्कालेवैशिष्ट्य
वर्णनेपिसंभवत्येवतयोरभेदेनप्रतिपादनमितिचेत्किंपूर्वकालोपलक्षितस्यैवैतत्कालेविशिष्टेनाभेदःप्रति
पाद्यतइत्युच्यते।किंपूर्वकालोपलक्षितस्यवर्तमानकालेवैशिष्ट्यलक्षणधर्मप्रतिपादनेनअर्थाद्भेदःसिध्य
तीति॥नाद्यः॥विशिष्टस्वरूपयोरभेदासंभवात्तथासतिवर्तमानकालविशिष्टस्यप्रागपिसद्भावप्रसंगात्तना
वेद्वितीयः साक्षादेवाभेदेनप्रतिपादनेसंभवतिपरंपरयातत्प्रतिपादनाश्रयेणस्वायुक्तत्वात्उभयलक्षणाश्रयणेक
ल्पनागौरवात्तदाश्रिमतइतिचेत्मैवंपरंपरयाअभेदप्रतिपादनात्साक्षादभेदप्रतिपादनेबुध्दिलाघवस्यदर्शि
तत्वात्तत्रापिविनिगमनायाक्तोहेतुरितिचेत्मुंबुद्धितार्थस्यसाक्षात्प्रतिपादनलाभएवेतिब्रूमःएवंवेदांतिमार्गे
णपदद्वयलक्षणापक्षावलंबनेप्यालंकारिकमतेजहदजल्लक्षणासिध्यत्येवेतिपरेषांतदनुदाहरणमज्ञान
विलसितमेवएतास्तिस्रोपिशुध्धाएवउपचारेणमिश्रत्वात्उपचारोनामगुणयोगःतदभावादेवआसांशुध्ध
त्वंभिन्नत्वेनप्रतीयमानयोरेकारोपणमुपचारेइत्यकृतंसिंहोयमितिवक्ष्यमाणेसाध्यवसानप्रभेदेगौणेविषय
स्यविषयिनिगीर्णत्वेनप्रतीत्यभावात्तत्रशुध्धत्वमेवस्यात्ननुप्राभाकराः सर्वत्रजातिशब्दार्थवादिनोव्रीहीन्
प्रोक्षतीत्यादावुद्देश्यस्यलेव्यक्तिलक्षणामाहुःसाकुत्रांतर्भवतीतिचेत्अज्ञानएवांतर्भवतीतिवदामःनह्य
त्रलक्षणाप्रयोजकंरूढिप्रयोजनयोरन्यतरत्संभवतीतितर्हिप्रोक्षणश्रुतेःकागतिरितिचेत्तत्रजातेःप्रो
क्षणसंस्कारान्वयानोपपत्त्याव्यक्तिरविनाभाविन्याक्षिप्यतेजात्यायथा॥भूयतामित्यत्रकर्तापश्येत्यत्रक
र्मक्रिययाक्षिप्यते॥यथावा॥ग्राममित्यत्रकर्मकारकेणगछेतिक्रियाक्षिप्यतेएवमर्थापत्तिमहिम्नापितत्र
तत्रपदार्थप्रतीतिर्दृष्टव्यारूढिप्रयोजनेविनाकुत्रापिलक्षणायाअप्रवृत्तेः अन्यथाअतिप्रसंगादितिसंतोष्ट
व्यंअत्रायंलक्षणसंग्रहःस्वार्थत्यागेसमानेपिसहितेनान्यलक्षणा॥यत्रेयमजहत्स्वार्थाजहत्स्वार्थाचतं
विना॥स्वार्थैकांशत्यागादर्थांतरमेवलक्ष्यतेयत्रसाजहदजहत्स्वार्थात्तत्वमसीत्यादिविषयेदृश्येयमिति
एवंशुध्धांत्रिविधांनिरूप्यसारोपायालक्षणांविभागंचाह॥सामानाधिकरण्येनभेदस्यापन्हवंविना॥विष

यारोप्यमाणारोपविषययोर्यदापन्नुतभेदोसामानाधिकरण्येनानिर्दिश्येते
तदासारोपेत्यर्थः॥ एतेनसाध्यवसानानुभेदउक्तः इयंतुद्विविधाशुद्धागौणी चेतितत्रगौणागुणसादृश्यनिमित्ता
शुद्धातुसादृश्येतरकार्यकारणभावादिनिबंधनिबंधनाएतेनलक्षणायाः पृथग्भूतागौणीवृत्तिरितितांत्रिक
समयः परास्तोवेदितव्यः तथाहिप्राभाकरास्तावदाहुः लक्षणातोगौणस्त्वयंभेदः गौणेहिपदप्रयोगादेवगु
णोपेतेतात्पर्येलक्षणायांतुपदार्थतोपलब्धेसंबंधिनिपदतात्पर्यमितिनान्वयमेवभेदोनोपपद्यतेयथाल
क्षणायांसंबंधिसंबंधयोः स्मृतयोरपिसंबंधिमात्रेन्वितेर्थेवाक्यतात्पर्यमवधार्यतेतथागौणेपिमुख्यस्यान
न्वयात्सदृशासादृश्ययोः स्मृतयोरपिसदृशमात्रएवतात्पर्यमवगम्यतामितिचेन्नैवंअग्निशब्दास्वार्थेस्मृ
तिः ततस्तस्यानुपपत्तिविमर्शात्तस्मात्स्वार्थात्सदृशेर्थांतरेस्मृतिः सदृशास्मृतिश्च॥ सादृश्यव्यतिरेकेण
नास्तीतिसादृश्यस्मृतिश्वास्त्येव॥ तन्नतावत्सदृशमात्रेतात्पर्यंपदांतरेणोपात्ततयापौनरुक्यापत्तेः॥ नापि
सादृश्यमात्रेसमानाधिकरणप्रयोगानुपपत्तेः ततः सादृश्यविशिष्टसदृशस्मृत्यातत्रैवाक्यतात्पर्यंसा
नुसमानाधिकरणपदप्रयोगबलादेवअतोगौणेसादृश्यविशिष्टान्वितेर्थेवाक्यतात्पर्यज्ञानसमयएवप
दस्योपयोगः लक्षणायांतवेक्षाक्रमवशेनसंबंधिमात्रेन्वितेर्थेवाक्यतात्पर्यात्संबंधिमात्रेपदतात्पर्येनसंबं
धोपेतेप्रतिपत्तौसत्यांतेनान्वयोयोगोपिनसंबंधविशिष्टेसंबंधप्रतीत्यर्थस्यतत्स्थतत्प्रतीतिमात्रार्थस्यवाक्य
तात्पर्यपूर्वकपदतात्पर्यातर्भावेमानाभावादितिनपदप्रयोगापेक्षा॥ तन्नयत्रापिगौणेपदप्रयोगोनास्तिअ
ग्निरधातित्यादौतत्रापिसादृश्योपेतएवतात्पर्यं॥ पदप्रयोगसहितस्तुलेतथेवतात्पर्यावधारणात्॥ यथा
काम्येकामिनीभोज्यान्वयबलादपूर्वेलिङादेरिष्टसाधनतात्पर्यमितिनैयायिकाः॥ ननुयदिलक्षणायांवाक्यतात्पर्य
ज्ञानसमयेनपदप्रयोगापेक्षाकथंतर्हितत्रपदप्रयोगधीरितिचेत्वाक्यतात्पर्यप्रतीत्यैवहिपश्चात्तत्रपदप्र
योगधीः संभूयकारिताभ्युत्पत्तेः यतएवंगौणेपदप्रयोगतात्पर्यनिरूपणपूर्वकमेवविशिष्टेर्थेवाक्यतात्पर्यग्रहो
विशिष्टान्वयपरत्वंतस्मिंलक्षणायांतुपदप्रयोगानिरपेक्षमेववाक्यतात्पर्येज्ञातेपश्चात्तत्रपदप्रयोगधीः अत
एवजघन्यत्वंगौणाल्लक्षणायाइतिरत्नत्रयंसिद्धमितिआचार्याः पुनः अग्निर्माणवकइत्यत्राग्निगतपै

DR. BHAU DAJI MEMORIAL

गल्यादिगुणसादृश्यान्माणवकेअग्निशब्दवृत्तिरिति॥ गौणीनामवृत्यंतरमुररीचक्रिरे॥ तथाचोक्तं॥ अग्निर्वलक्षि
तादर्थाद्यैर्मेगल्यादिगम्यते॥ तेनमाणवकेबुद्धिः सादृश्यादुपजायते॥ इतितान्प्रछामः॥ संबंधानुपपत्तिप्रयोज
नानिरवद्यलक्षणायाः बीजं॥ तानीहापिसंतिकिंनसंतिवा॥ आद्येकिमपराद्धंतत्रलक्षणाव्यवहारेण॥ नहितीयः॥
तेषांदुरपन्हवात्॥ नन्वत्रसंबंधोदुर्निरूपः॥ कस्तवायमभिप्रायः॥ अभिधेयाविनाभावोनसंभवतीतिचेन्मैवं
संभवतु॥ सादृश्येनुभविष्यति॥ नहिसएवसंबंधोलक्षणोपयोगीतिनियमः॥ कार्यकारणभावादेरपिसंबंधस्य
वक्ष्यमाणत्वात्॥ प्रयोजनंचताद्रूप्यप्रतिपत्तिः एवंचसत्यन्वयानुपपत्त्यापरत्रपरशब्दप्रयोगसाम्येविद्यमानेपि
यत्किंचिदवांतरवैधर्म्यावलंबनेनपदार्थजातिभेदांगीकारेतिप्रसंगस्यादितियत्किंचिदेतदिति॥ हृद्यमुदाहरंति॥
यथा॥ छिन्नेंद्रादिशिरोरसाद्रुधिरकेस्तकंधरोद्यैरस्रगंधारातेलधतेस्तवासिरगदंकारः समरेभवो॥ किंब्रूमोर
घुरामवीरमुचिनादक्षेणयेनाद्भुतंदुर्वारोदशकंधरः॥ प्रशमितः स्त्रैलोक्यतापज्वरः॥५॥ अत्रपूर्वार्धेअगदं
कारशब्देनलक्ष्यमाणरसौषधवटकतैलघृतसंपत्तिज्वरनिवर्तकत्वादिवैद्यगतगुणसादृश्यनिमित्तलक्षणा
गौणी॥ यदाहुः॥ अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते॥ लक्ष्यमाणगुणेयोगाद्वृत्तिरिष्टातुगौणीति॥ गुणाश्च
स्वपरसाधारण्येनलक्षणायाः॥ अन्यथास्वार्थगतानामर्थांतरत्ववृत्तिनिमित्तत्वेवैय्यधिकरण्यदोषः परग
तानांतुस्वार्थासंबंधानांलक्ष्यत्वानुपपत्तेः॥ साधारण्येतुनकश्चिद्दोषः॥ उत्तरार्धेतापहृतोदशकंधरेतापश
ब्दस्यप्रवृत्तिनिमित्तंकार्यकारणभावसंबंधइति॥ शुद्धालक्षणाउभयत्रापि॥ विषयनिगरणाभावात्सारोपता॥
रवद्वेरावणेचक्रमाद्वैद्यत्वेनचतापज्वरत्वेनचप्रतीतिः॥ प्रयोजनं॥ इयंहिविधापिरूपकादेर्बीजं॥ मुखचंद्रःनेत्रा
नंदः चंद्रइतिचोभयमूलत्वेनापिरूपकस्योक्तेः उपचारश्चकार्यकारणभावतादर्थ्यस्वस्वामिभावावयवावयवी
भावतात्कर्म्यरूपनिमित्तानांपांचविध्येनपंचविधाभवतितत्रायउदाहृतः तादर्थ्येनयथाइंद्रार्थाः स्थूणाइंद्रः
स्वस्वामिभावेनयथाराजकीयः पुरुषोराजाअवयवावयवीभावेनयथाअग्रहस्तोहस्तः तात्कर्म्येणयथाअ
क्षातक्षा॥ एवंक्रमादिष्टप्रदत्तानुल्लंघ्यत्वसामर्थ्यकौशलविशेषाः प्रयोजनानिव्यंग्यानि॥ साध्यवसानालक्ष्
यतिनिगीर्णोविषयोन्येनयदिसाध्यवसानिका॥ सापूर्ववृद्धातेनलक्षणासत्तलक्षिता॥ अन्येनविषयि

णविषयनिगरणेनाभेदप्रतिपत्तिरध्यवसायः तेनसहितासाध्यवसानात्तत्रअद्याथथाअयंकामधेनु रित्यत्रअ
नवरतवितरणशीलत्वगुणसादृश्याद्रामेकामधेनुरूपताध्यवसानं॥सर्वदेवअभिन्नत्वप्रतीतिः प्रयोजनंहेतु
योयथाअयंअभ्युदयोलोकानांअत्रअभ्युदयहेतुत्वात्रामेअभ्युदयेशब्दप्रवृत्ति अन्यथाविचारेणकार्यानिष्पाद
कत्वंइहापिप्रयोजनंअत्रोभयत्राप्ययंशब्दोनरामाख्यविषयपरामर्शितदासारोपत्वप्रसंगात्किंतु॥तदंतेदंता
मात्रंपरामर्शविषयिणमारोप्यमाणांकामधेनुमेवपुरोवर्त्यभेदाध्यवसायेनेदंतयाविशिनष्टितद्विशिष्टाचविष
यिणीकामधेनुनिगीर्णाविषयतयास्वतादात्म्येनप्रतीयतेएवमयमभ्युदयइत्यत्राप्यूह्यं॥इयमतिशयोक्तिभे
दबीजंअध्यवसितप्राधान्येत्वतिशयोक्तिरितिलक्षणात्सलोतिजहल्लक्षणाअजहल्लक्षणाजहदजहल्लक्षणाशु
द्धसारोपाशुद्धसाध्यवसानाचेतिपंचशुद्धगौणसारोपागौणसाध्यवसानाचेतिद्वैगोण्यो॥तयोर्गुणयोगादेवशुद्धा
भ्योभेदः शुद्धत्वंचतासामगौणत्वमेवआरोपाध्यवसानाभ्यामेवगौण्योर्मिथोभेदः।सारोपाध्यवसानशुद्धयोश्च
नाभ्यामेवान्योन्यभेदःजहदादिशुद्धाभ्यस्तकार्यकारणभावादिसंबंधनिबंधयोपचाराद्वेदर्शनिकुत्रापिसा
कर्मशंकावकाशः॥एवंफलतोलक्षण्याःसप्तविधत्वेपित्रिविधसंकरेणैकविधसंसृष्ट्याचमेलनेप्रत्येकंचातु
र्विध्येनाष्टाविंशतिभेदाभवंतिशुद्धभेदैरपिमेलनेसप्ताधिक्यात्रिंशन्नः पंचत्रिंशत्प्रकाराः स्वैः प्रभेदैश्चसंकल
नेतुसंख्यांतुमेवनशक्यंतेतत्प्रकाराःयदाहुः संकरेणात्रिरूपेणसंसृष्ट्याचैकरूपया॥अस्याःसंकलनेन्योन्यमष्ट
विंशतिःरीतिता॥पंचत्रिंशत्समाख्याताशुद्धभेदैःसमंपुनः॥स्वैःप्रभेदैरलंकारैर्धानिभेदैश्चसंगता॥वितन्वती
चमत्कारंसंख्यामत्सरिणीमताइतिशुद्धभेदैरलंकारभेदैः स्वैः प्रभेदैः लक्षणाभेदैः संख्यामत्सरिणीअसंख्येत्य
र्थः॥संकरश्चअंगांगीभावेनसंशयेनएकवाचकानुप्रवेशेनचेतित्रिरूपः तत्राद्यायथा॥संवर्धयंतंनिजजी
वनेनशुचिंसदाबाडवमंबुराशिं॥विनाश्यरामस्यशरस्फुलिंगावान्निषंगगर्भेनिभृतोनिशेते॥६॥जीवनेनज
लेनप्राणेनचशुचिंवाडवंवाडवाग्निंशुद्धब्राह्मणंचअत्रजीवनादिशब्दश्लेषबलमूलकाभेदाध्यवसायेन
सागरःस्वप्राणेनशुद्धब्राह्मणपोषकइतिप्रतीयतेतद्विनाज्ञानरूपानुचितकर्माचरणजनितलज्जानिषंगको
द्दीपनहेतुतयाऽऽक्षिप्यतेसाचवाचकपदाभावात्गम्येतिश्लेषातिशयस्यसंसृष्टेरंगांगिभावस्यसंकरः लज्जायाः कचि

यशुध्यसारोपाणांयथाकल्याणकेलिकलनाकविपुंगवानांकोतूहलंकिमपिकंजविलोचनां॥ कीर्त्युद्गमःकमलबं
धुकुलोद्भवानांकस्योत्सवंनकुरुतेभुविकोसलेंद्रः॥११॥अत्रकल्याणादिपदानांतथेतोरामेविषयनिगरणंविना
साद्दश्येतरकार्यभावसंबंधनिमित्तप्रवृत्तत्वात्प्रकृतसारोपाणांसजातीयानामेवसंसृष्टिः सजा तीयविजा तीयसं
सृष्टिर्यत्रासतांस्फुरतरूप्यानंचिंतामणिमहीधरः॥संपल्लूपर्वणांरामोविपद्विद्रुधवैरिणां॥१२॥एवमेवसर्वत्र
संकरसंसृष्टेदृष्टव्येतिनिभुवनपवित्रहरितगोत्रगोतंसवारणसीवंशपद्माकरप्रभातभानुनापदवाक्यप्रमा
णपारावारपारीणश्रीमद्दोध्यायपर्वतनाथपांडितमंडलेश्वरसूनुनाथल्लंमाबागभरल्लाकरपारिजातेननिर्म
लालंकारचूतेनचतुर्दशविद्याभूषणवताश्रीधर्मसंरब्धावताविरचिते • साहित्यरत्नाकरनामन्यलंकारशास्त्रे
लक्षकशब्दनिरूपणंनामतृतीयस्तरंगः॥३॥ ॥अथनिष्प्रयोजनलक्षणाभावात्सर्वत्रप्रयोजनंवाच्यं
द्रव्यपेक्षायांतस्यव्यंजकशब्दैकगम्यत्वाक्रमप्राप्यत्वाच्चव्यंजकंनिरूपयति॥सव्यंजकोर्थयःशब्दोव्यंजने
नैवबोधयेत्॥अन्वितेषुपदार्थेषुमोक्षांशेतरगोचरः॥वाक्यार्थोपस्क्रियायैवव्यापारोव्यंजनंभवेत्॥व्यंज
नव्यापारवान्शब्दोव्यंजकःपदार्थेष्वन्वितेषुवाक्यार्थोपस्कारार्थेअर्थांतरविषयःशब्दव्यापारोव्यंजन
इत्युच्यते॥सत्रिविधः॥शब्दार्थोभयशक्तिमूलत्वेन॥शब्दशक्तिमूलोपिद्विविधः॥अविधामूलोलक्षणा
मूलश्चेति॥तत्रयःपूर्वोदाहृतप्रयोजनलक्षणानांप्रयोजनंप्रतीतिंकुर्व्यापारः॥सःसलक्षणामूलोव्यंज
नव्यापारः॥इदंतावदिहविचार्यते॥गंगायांघोषइत्यादौतीरगतात्यंतपावनत्वादिकंप्रयोजनंतावत्प्रतीय
तेतत्रशब्दान्वयव्यतिरेकानुविधायितयातत्प्रतिपत्तिःशब्दीत्यवश्यमाश्रयणीयंनचयंकंचनव्यापार
मनवलंब्यशब्दोबोधयितुमीष्टेतन्नकिमभिधयाबोधयतिकिंलक्षणयाकिंवातात्पर्येणेतिनतावदभि
धयातस्याःसंकेतितार्थविषयत्वात्नाहिगंगादिपदानांपावनत्वादौसंकेतोदृष्टचरः नापिलक्षणयासु
मुख्यार्थबाधाद्यभावात्॥नहितटंमुख्यार्थःनवातस्यबाधःनापितस्यात्यंतपावनत्वादिनासंबंधःनापिप्र
योजनलक्ष्यतायांकिंचित्प्रयोजनंस्वस्यैवप्रयोजनत्वेआत्माश्रयदोषप्रसंगात्अन्यस्यप्रयोजनत्वेकस्या
पिलक्षणामात्रशरणतयाप्रयोजनांतरावश्यंभावात्प्राचीनप्रयोजनापेक्षायांपरस्पराश्रयताअन्यापे

क्षणेतुतस्याअखिलस्यत्वेनप्रथमोपेक्षणेचक्रकापत्तिःद्वितीयापेक्षणेअन्योन्याश्रयतातृतीयापेक्षणेआत्माश्र
यता चतुर्थापेक्षणेतुतस्याअपिप्रयोजनाकांक्षित्वंनिश्चितमितिउत्तरोत्तरमाकांक्षायाःक्वचिदप्यविश्रांतेःप्रथमप्रयो
जनप्रतीतिरेवनस्यादितिज्ञातिप्रतिबंधिकानवस्थाननुगंगादिपदेनसंप्रयोजनमेवतटंलक्ष्यतामेवं॥प्रमाणविष
यातिलंघित्वात्॥प्रयोजनस्यप्रमाणस्यहिप्रत्यक्षादेर्घटादिकंविषयःफलंतुज्ञाततादिकंतुआचार्यप्रयोगःगंगाया
घोषइत्यादेःपावनत्वादिकंनाविषयज्ञानगोचरः॥फलत्वात्ज्ञाततावत्इतिनापितात्पर्यवृत्तिगम्यतापदार्थावग
मसमनंतरभाविनीसमन्वयशक्तिस्तात्पर्यनामवृत्तिरित्यलंकारसर्वस्वंजीवनीकारः॥नचपावनत्वादिरन्योन्यत्व
रूपःकिंचितात्पर्यनामवृत्यंतरंनसंभवतिवृत्तित्रयानुत्थूतस्यतस्यवृत्यंतरत्वानुपपत्तेःकूटस्थेनेववृत्तित्रयेण
सर्वव्यवहारोपपत्तोबाह्येंद्रियसहकारिणोमनसःइंद्रियाणांतरत्वकल्पनावत्तात्पर्यस्यवृत्यंतरत्वकल्पन
मयुक्तमेवेतिकेचिदित्यलंविस्तरेण॥तदेवंप्रयोजनप्रतीतेरभिधालक्षणातात्पर्यवृत्तिनिर्वर्तनायलेनतद्व्यं
ग्यव्यापारांतरमवश्यमभ्युपगंतव्यंभवतापिवयंतुतत्रैवध्वननव्यंजनद्योतनादिसंज्ञांविनिवेश्यव्यवहरामः॥
तच्चव्यंग्यंप्रयोजनंद्विविधंगूढमगूढंचेतिगूढंयथावीरश्रीरघुरामेभद्रभवतोधाटीसमाटीकनेभेरीभूरिविराव
डंबरभैरेरांरवंडलश्रीश्चिरात्॥निद्राणायरजागरीतुदुचितंदेतेयभूतिश्चिरादुन्निद्राकथमाशुमुद्रणमगाद
स्फुरन्निद्राकृतं॥१३॥अत्रनिद्राजागरणयोःछेदनधर्मयोःअचेतनस्फुरास्फुरविभूत्योरसंभवात्तत्कार्यसंकुचि
तत्वंअसंकुचितत्वंचलक्ष्यतेतेनचसकलस्फुरास्फुररक्षणशिक्षणेव्यज्यतेअगूढंयथानुष्यं चंडीशकोदंडरा
मदोर्दंडंचेतां॥व्याचष्टेविष्टपस्पष्टघोषणेशानुभीषणे॥१४॥अत्रअचेतनेकोदंडेचेतनधर्मस्यव्याख्यानस्या
नुपपन्नतयातत्कार्यंद्रापनमात्रंलक्ष्यतेतेनचपरमोत्कर्षोव्यज्यतेएतत्सर्वकविभिरुच्यमानत्वेनवाच्या
यमानतयाअगूढंतदेवंलक्षणामूलाव्यंजनोक्ताअधुनाअभिधामूलानिरूप्यतेअत्रकाव्यप्रकाशकारः॥
अनेकार्थस्यशब्दस्यवाचकत्वेनियंत्रितेसंयोगाद्येरवाच्यार्थधीकृद्व्यापृतिरंजनमिति॥अभिधामूलव्यंज
नालक्षणमुक्तवान्संयोगाद्योभर्तृहरिणास्मृतिता॥संयोगोविप्रयोगश्चसाहचर्यंविरोधिता॥अर्थःप्रकर
णंलिंगंशब्दस्यान्यस्यसन्निधिः॥सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः॥शब्दार्थस्यानवच्छेदेविशेष

स्मृतिहेतवइतितत्रसंयोगेनाभिधानियंत्रणंयथाकृष्णः कौस्तुभभृषिंवृतिकौस्तुभसंयोगाद्वासुदेवेनार्जुने॥कृ
ष्णः कौस्तुभवर्जितइतिविप्रयोगान्तत्रैव॥ रामलक्ष्मणावितिसाहचर्यात्दाशरथौ॥रामरावणावितिरोधातत्रैव
रामंमोक्षायचिंतयेदितिप्रयोजनात्तत्रैव॥ देवोवः प्रमाणमितिप्रकरणाद्युष्मदर्थेकुपितोगरुडध्वजइतिकोपाद्ध
स्याचेतनेध्वजभेदेऽसंभवाद्धरौदेवस्मरमापतेरितिशब्दांतरसान्निध्यात्तत्रैव॥ मधुनामतः कोकिलइतिसामर्थ्या
द्वसंतेपातुवोदोलामुखमितिओचित्यात्सांमुख्ये॥अत्यन्तपरमेश्वरइतिराजानिःविरोचनोभातिदिविरात्रौचदिवा
करेचंद्रेचवह्नौचमित्रंदृश्यतांमितिस्त्रिपुंनपुंसकरूपवाच्यत्वासोद्वादमित्रोदृश्यतामितिरवौदृश्यइत्युपपू
र्वपदप्रकृतिस्वरेणबहुव्रीहेरर्थानिश्चयः द्वादशाहीनस्येत्यत्रद्वादशाब्दस्यसंख्यास्वरेणद्वंद्वार्थनिश्चयःअह
शब्दस्यमध्योदात्तेनअहर्गणार्थनिश्चयइतिस्वरेणार्थनिश्चयोवेदएवनकाव्येयादिशब्देनअभिनयादयः
संहिताःएवंसंयोगादिभिरभिधायांनियमितायांअनेकार्थस्यशब्दस्यअर्थांतरमपियत्रकुचनप्रतीतिगोचरीभ
वतितत्रव्यंजनव्यापारएवप्रगल्भतेलक्षणातात्पर्ययोःसामग्र्यभावेनअन्योन्यानपेक्षविषयत्वेनचप्रवृत्ते
अनवकाशापराहतत्वात्यथाअत्यर्जुनयशोराशिःकृतसंरक्तर्तर्पणःएकःवीरोपतापश्चरामोराजतिराजघ्नः
॥१४॥अत्रदाशरथिपक्षेअर्जुनोनिष्कलंकःयशोराशिःयस्येतिविग्रहःजामदग्न्यपक्षेतुअर्जुनःकार्तवीर्यः
तस्ययशोराशिंअतिक्रांतवान्नाशितवानितिविग्रहःकृतसंरक्तर्तर्पणःकृतंसंरक्तानांस्वस्मिन्सम्यगनुरा
गवतांतर्पणंप्रेमानंदेनेतिप्रकृतेपिअन्यत्रतुकृतंसम्यक्रक्तकृतर्पणंशोणितेननिर्वापोयेनेतिसम्यक्कृतंवर्ण
यात्रातिज्ञंयमाशास्त्रंवानुष्ठितवंतंकवीरःअपतापइतिपदद्वयंप्रकृतेअन्यत्रएकपदंएकवीरासुपतापया
नीतिराजघइतिराजघश्चेतिनिपातनात्साधुःअत्रदाशरथौरामएवअभिधायाःप्रकरणादिनानिर्गलित
त्वादप्रकृतजामदग्न्यरूपार्थप्रतीतिस्तत्कलंजनव्यापारकृतेवनन्वत्रश्लेषमहिम्नाअर्थांतरप्रतीतिरस्त्विति
चेन्नश्लेषस्यशाब्दीकरणिकगतत्वेनवाअशाब्दीकरणिकगतत्वेनवानियमनात्तदेवंद्विविधोपिशब्दशक्तिमूलो
व्यंजनाव्यापारोनिरूपितःअर्थशक्तिमूलोयथाअभिषिषेणविजयोरघुपुंगवेमुदमवंदतदेववरूथिनी
क्षितिसुताभयमंबुधिमेखलाकलशसिंधुसुतेतुतदोभयं॥१५॥अभिषिषेणयिषोसेन्यैःसहशत्रुमभिगं

तुमिछतिसतियद्वैन्यानेभिगमनमरोतदाभिषेणनमितिस्फुटत्वात्अत्रस्फुरसेनामोदरूपवस्फुरशक्त्यात्का
रणभूतोदेत्यानामत्यर्थोभविष्यतीतिद्योत्यतेक्षितिसुताभयरूपार्थशक्त्याताधेतुभुतोरामचमूचरणाभिधा
वादस्यासिताजनन्याःभाविन्यार्तिरितिव्यज्यतेअब्धिमेखलाक्षीराब्धिसुतयोःखेदमोदरूपवस्फुरशक्तिभ्यांरा
मचमूरजसासागरशोषणेसतिभुवोभूषणहानिःसपत्नीपितृहानिश्चेतिखेदमोदहेतूतथालक्ष्म्यास्तुखे
दमोदहेतूनिजपितृहानिःसपत्न्याःभुवःभूषणस्वरूपहानिश्चभाविष्यतइतिभव्यतइतिनित्यार्थशक्तिमू
लोव्यंजनव्यापारोवर्णितःउभयशक्तिमुलोयेथापरश्रुगतिभीषणात्सासंगरलीलास्फुबाहुजस्तोभे॥सो
दारामोपिरेजेपितृभक्तोविप्रदत्तभूवलयः॥अत्रकृतेदाशरथिरामेपरश्रुगतिभीषणात्सापरेषांशिष्टानांशु
चःदुःखस्यातिभयंकरंस्वरूपंयस्येतिविग्रहःसंगरलीलास्फुबाहुजस्तोभंसोढायुधकेलयांस्फुबाहुजस्तो
भंस्फुबाहुनामकास्फरजनितविमर्दंसोढाशमितवानित्यर्थःअत्रसोढेत्यस्यक्तण्णंतत्वांनलोकेत्यादिना
षष्ठीनिषेधकर्मणिद्वितीयेतिवेद्यंजामदग्न्यरामपक्षेपरश्रुगत्याकुठारव्यवहारेणभीषणात्सासंगरलीलास्फि
तसंभ्यंतंभिन्नपदंबाहुजाःक्षत्रियाःउत्तरार्धमुभयत्राप्यविशेषंअत्रपूर्वार्धशब्दशक्तिमूलःउत्तरार्धअ
र्थशक्तिमूलइत्यभयशक्तिमूलोव्यंजनव्यापारःअत्रपूर्वत्रचरामोरामइवेरूपमालंकारोव्यज्यतेनच
शब्दशक्तिमूलध्वनावपिशब्देस्वार्थव्यतिरेकादर्शनादर्थस्यैवव्यंजकत्वमास्तीतिवाच्यंतत्रशब्देस्यैवप्रा
धान्यात्अर्थस्यसाहकारिमात्रत्वात्यथाहुःअर्थावव्यंजकःतन्नसाहकारितयामतइतिएवमेवार्थ।शा
क्तिमूलध्वनावपिशब्दस्यसाहकारिमात्रत्वंदृष्टव्यंसकुदुच्चारितःशब्दोनद्वितीयमर्हतीतिनिषेधःकेवा
लयोरभिधयोर्लक्षणयोरभिधालक्षयोर्वाभवतिनत्वभिधाव्यंजनयोःलक्षणाव्यंजनयोर्वास्यादितिमंतव्यं
अनन्यार्थासिद्धकार्यबलेनाभिधालक्षकयोःव्यंजनव्यापारवत्वस्यपूर्वमुपपादितत्वात्तदेवंवाचकलक्षकव्यं
जकरूपास्त्रिविधाःशब्दास्तद्व्यापाराःअभिधाव्यापाराःअभिधाःलक्षणाःव्यंजनात्मिकाःवाच्यलक्ष्यव्यं
ग्यरूपाःतदर्थाअपिव्यवस्थिताःकाव्यप्रकाशकारस्तुसर्वेषामेतेषांअर्थानांव्यंजकत्वंअभिदधौवक्तृबो
धव्यकाकूनांवाक्यवाक्यान्यसंनिधेः॥प्रस्तावदेशकालादेःवैशिष्ट्यात्प्रतिभाजुषां॥योर्थस्यान्यार्थधी

हेतुर्व्यापारोव्यतिरेक्येतिव्यक्तिर्व्यंजनाअर्थव्यंजकत्वेशब्दोपिसाहकारितयाव्यंजकएवनाहिशब्दस्पर्शोविना
मानांतरोपनीतानांएतेषांअर्थानांव्यंजकत्वंअवगतंवर्त्मप्रपंचितंचेदुदाहरणमुखेनतेनेवस्वग्रंथेअस्माभिस्क
तत्सर्वेअर्थशक्तिमूलध्वनावंतर्भवतीतिनटअकूसंभ्रमःक्रियते॥ ॥इतिश्रीभुवनपालेनहरितसगोत्रावत
तंसवाराणसीवंशपद्माकरप्रभातभानुनापदवाक्यप्रमाणपारावारपारीणश्रीमद्दोपाध्यायपर्वनाथसूरिसू
नुनाश्रीयल्लमांबागर्भरत्नाकरपारिजातेननिर्मलाचारपूतेनचतुर्दशविद्याभूषवताश्रीधर्मसंख्यावताविरचि
तेश्रीमद्रघुकुलतिलकचरितेयशोधनसारसारसरभिकृतेसाहित्यरत्नाकरन्नामन्यलंकारशास्त्रेव्यंजकश
ब्दार्थवृत्तिनिरूपणंनामचतुर्थस्तरंगः॥४॥ धर्मातर्वाणिवर्यस्त्रिभुवनविदितेवारणास्यन्वयेयःसंजातःपर्वते
शात्छुभगुणगणभूर्यल्लमंबासकगर्भेव्याख्याविख्यातकीर्तिर्विवरणगुरुवात्सांख्यमुख्यागमानांतस्यालंकारशा
स्त्रेरघुपतिचरितेस्यानुरायस्तरंगः॥४॥ ॥सगुणालंकृतीकाव्यंपदार्थौदोषवर्जितौवितिकाव्यसामान्यल
क्षणेपदार्थयोर्विशेष्यतयाप्रधानत्वात्तरंगन्नयेपदार्थौन्यरूपितौ॥तदनंतरंतद्विशेषणानांगुणालंकारदोषा
भावत्वरूपाणांत्रयाणांमध्येगुणालंकारयोर्भावरूपत्वादादौतयोरुपादानंतत्रापिरसेसमवायवृत्त्याउपस्का
रकाणांसंयोगवृत्त्योपस्कारकेभ्योलंकारेभ्योंतरंगत्वात्तेषांमादावुद्देशःकृतइतिउद्देशानुसारेणगुणास्तावद
दौनिरूप्यंते। ननुसगुणालंकृताक्रियावितिविशेषणमनुपादेयमितिचेत्कुतोनुपादेयतातत्किंअव्याप्त
र्तकत्वात्अचारुताःहेतुत्वात्अन्यतरवैय्यर्थ्याद्वानाद्याः॥निर्गुणलंकारशब्दार्थेभ्योव्यावर्तकत्वात्नाहितीयः
तेषामुभयेषामपिकविताकामिनीकमनीयकारणतयाउपादेयत्वेविवादाभावादुक्तंहियुवतेरिवरूपमंगका
व्यंस्वदत्तेसुधगुणंतदप्यतीव॥विहितप्रणयानिरंतराभिःसदलंकारविकल्पकल्पनाभिः॥यदिभवतिवचः
श्च्युतंगुणेभ्योवपुरिवयौवनवंध्यमंगनायाः॥अपिजनदयितानिदुर्भगालंनिभृतमलंकरणानिसंश्रयंतइतित
तीयंविकिमुभयोरभेदादन्यतरवैय्यर्थ्यंकृतकरत्वाद्वाअद्योपिचारुताहेतुत्वसाम्यादभेदः परस्परव्यावर्तकधर्मा
भावाद्वानाद्याः॥यत्किंचिद्धर्म्यसाम्येनाभेदेसर्वस्यांभेदप्रसंगः॥नाहितीयः॥असिध्येः तथाहि।अत्रकेचनभोजराजा
दयः। काव्यव्यवहारप्रवर्तकागुणः तच्चारुताहेतवोलंकाराइतिव्यावर्तकधर्ममाहुः॥तन्नोपपद्यतेयत्किंसर्वे

गुणास्तत्प्रवर्तकाःकतिपयेवानाद्याः॥रीतिरात्माकाव्यस्येतिहितन्मतं।रीतयश्च।गुणश्लिष्टपदरचनात्मकाःता
श्चतस्रः।गौडीवैदर्भीपांचालीचेति।तत्रसमग्रगुणावैदर्भीओजःकांतिमतीगौडीमाधुर्यसौकुमार्यधुर्यापांचाली
तिर्हिस्थितिः।तत्रगुणसाकल्यस्यकाव्यव्यवहारप्रवर्तकत्वेगौडीपांचाल्योरव्याप्तिःनाहितीयः।अतिव्याप्तेःयत्किंचित्
गुणस्तामात्रेणयत्रकुत्रापिकाव्यव्यवहारप्रसंगात्एवमलंकारलक्षणमपिदूषणीयंवयंतुब्रूमःसमवायवृत्त्या
सोपस्कारकत्वंगुणसामान्यलक्षणंसंयोगवृत्त्यारसोपस्कारकत्वमलंकारसामान्यलक्षणंसमवायसंयोगपदाभ्यांगु
णालंकारयोःपरस्परव्यावृत्तिःसिध्या॥रसाःशृंगारादयोनववक्ष्यमाणलक्षणाःतद्व्यतिरिक्तव्यतिरिक्तोपस्कारक
त्वमिहलक्षणहृद्येविवक्षितंनत्वत्रसर्वेषांगुणानांरसोपस्कारकत्वेअसंभवःतत्तद्गुणानांतत्तद्रसप्रतिनियतत्वेस्व
माणत्वात्कतिपयानांत्वतिव्याप्तिरितिआत्मीयएवबाणोभवंतंप्रहरतिचेन्मैवंरसातिरिक्तेगुणानांप्रवर्तनेनातिव्या
प्तेरभावात्नाहिगुणागुणिनंविहायान्यत्रसमवयंतीतिदृष्टंननुमाधुर्यादयोगुणावर्ण्येषुप्रतीयंतेयत्रकुमा
रवर्णविन्यासःतत्रमाधुर्यप्रतीतिरन्यत्रतेनैतिअन्वयव्यतिरेकाभ्यांवर्णमात्रधर्मत्वावगमात्अतोसंभवइति
चेत्मैवंतत्रमाधुर्यंविशिष्टरसस्यव्यंग्यत्वेनव्यंग्यगतमाधुर्यस्यव्यंजकेसमारोप्यप्रतीतेःतत्परिशीलनशा
लिनांतुरसिकानांरससमवायितयातदुत्कर्षाधायिनोमाधुर्यादयोअनुभवपथंतिमध्यासतेअतएवतेषांगुण
त्वव्यवहारःपद्येतेरसशरीरभूतवाच्यवाचकधर्माएवस्युःतर्हिनगुणाःस्युःनह्यात्मधर्माःशौर्यादयःशरी
रशरीरमात्रसंसर्गिणोलंकारागुणत्वेनव्यपदिश्यंतेतोहिहारादयःवक्षःस्थलादिषुसंयोगितयेवशब्दार्थरूपेष्व
यवेषुउत्कर्षाधानहाराआत्मनःशरीरस्योपकारिणःननुगुणाःसमवायप्रवृत्त्यांगिनिरसेस्थिताःअहंकारास्तु
संयोगवृत्त्यांगमात्रगताइत्ययंविभागः॥कुतइतिचेत्आत्मभूतरसप्रतीतिव्यवधानाव्यवधानोतथाअनुभवाव
स्थापितत्वादितिब्रूमः॥माधुर्यादीनांवर्णैर्व्यज्यमानानांयदिव्यवधानेनरसपोषकत्वंतदवेतेषांरसेसमवाय
वृत्तित्वउपमादीनांतुवाच्यवाचकोपस्कारिणांयदवाभिधादिव्यापारव्यवधानंतदवेतेषांसंयोगवृत्तित्वमिति
रहस्यंननुयादिगुणारसधर्माएवनशब्दधर्माःतर्हिकथंतद्विशेषणत्वंअसंबंधादितिचेत्रसधर्माणामपितेषांवा
च्येषारोपेणसंबंधोपपत्तेःदृश्यतेहिअन्यधर्माणामेवह्रस्वत्वादीनांआरोपेचसंसर्गेणविशेषणत्वंयथार्थ

व्यवहारजनकत्वंवअतोन्यधर्माणामपिगुणानांवर्णविशेषणत्वंनविरुध्यतेकिंचलोकेऽपिमुलभुजत्वविपुलोरस्क
त्वादिनाऽप्याकारविशेषेणकस्यापिशौर्यमवगम्यान्यत्रअस्रेरेपितमेवाकारमवलोकयंतःतत्रेवशौर्यंव्यवहरं
तिसरसाःसोयमाकारःस्फुरतिअतोव्यंजकेव्यंग्य धर्मारोपदर्शनान्माधुर्यादेर्वर्णनिष्ठताप्रतीतेरोपाधिकत्वात्प्रयु
क्तंरससमवेतागुणाइतिनापिकृतकरत्वात्स्फुरतितृतीयेद्वितीयः॥गुणकृतचारुतायाअलंकारकृतचारुताविलक्ष
णत्वेनकृतकरत्वाभावात्तथाहिअलंकाराह्यंगिनिरसेविद्यमानेतदंगभूतशब्दार्थवैचित्र्याधानद्वारेणरसोपस्का
रकाःयथाहारादयःकरचरणाद्यवयवसौंदर्यातिशयाधानद्वारेणांगिनोतिशयमाधत्तेक्वचिदविद्यमा
नेपिरसेशब्दार्थवैचित्र्यजननमात्रेणापिपर्यवस्यंतियथाचित्रेप्रतिमायांवाअविद्यमानेआत्मनिहारादय
नचैतावतासंयोगस्यारसोपस्कारकत्वरूपस्यालंकारसामान्यलक्षणस्यनीरसकाव्यगतालंकारेष्वव्याप्ति
राशंकनीयातथाविधस्थलेरसशब्दस्यव्यंग्यव्यंजकजातीययोरभेदाध्यवसायेनप्रवृत्तत्वात्गुणाः पुनर्वि
द्यमानेरसेतंपुष्णंतेअविद्यमानेतुस्वयमेवनविद्यतेरसपोषकत्वंतुदूरतोपास्तंइत्थंगुणालंकारयोश्चारुता
यांवैलक्षण्यात्कृतकरत्वाभावेनद्वयोरप्युपादेयत्वंसिध्यंकाव्यप्रकाशकारोद्यास्त्रीन्गुणान्पर्यजीगणन्तां
श्चान्यान्ससभोजाद्याःतांश्चतुरश्चापरेमाधुर्यौजःप्रसादास्त्रयएवगुणाइतिकाव्यप्रकाशकारादयःप्राहुः
एतांश्चान्यानपिसोकुमार्यार्थव्यक्तिसमतोदार्यकांतिसमाधानसन्नभोजराजादयःएतांदशचान्यांश्चतुर्दश
विधानाभादयश्लेषःप्रसादसमतामाधुर्यसुकुमारता॥अर्थव्यक्तिरुदात्तत्वंतथाकांतिरुदातता॥ओजः
स्फुशब्दताप्रेयःओर्जित्यंमथाविस्तरः॥समाधिःसौक्ष्म्यगांभीर्यसंक्षेपोभाविकंतथा॥संमितत्वंतथाप्रौढि
रितिसप्तविधंतथागतिरिति॥तत्रमाधुर्यादयःत्रयःसर्वसंप्रतिपन्नाःआनंदनिष्यंदलंमाधुर्यंतस्यप्राचुर्ये
णपटथकूटथकूपदतालक्षणाःशब्दधर्मोव्यंजकःइदंरसंभोगाविप्रलंभकरुणशांतानुरूपंओजःपुनः
दीप्त्यात्मकंचेतोविस्तारहेतुःतत्व्यंजकत्वंसमासभूयस्त्वंवीररौद्रभीभत्सभयानकेषुचेतःप्रयोज्यं॥यश्चि
त्तंद्रुतेन्हायशुष्केंधनमिवानलः॥सप्रसादोमतःसर्वरससाधारणस्थितिः॥माधुर्यंयथा॥रामेभिमु
खेसीता व्रीडाद्विमुखितमेवमणिभितोदृष्टाततोपिविमुखीसमंदहासंप्रियेणपरिरेभेओजोयथा॥शुं

भकुंडालशैलाविरलपरिगलद्दानधाराभ्राणिभ्राम्यत्कुंजरैरधांगान्यस्करद्वारियुतान्युग्ग्रवेदंतानिआकर्णाकृ
ष्टचापच्युतनिबिडतरोच्चंडकांडप्रकांडा ज्वालामालाकरालोग्रादहतिरघुशिखीवैरिसेनावनानि॥प्रसादो
यथा॥चरंतमंबरेदृष्वारामेणप्रेरितंखगं॥अहीनावैरिणोभीत्यामुंचंतिनगराण्यहो॥एतेत्रयोभावरूपाःइत
रेषुकेचिद्भावरूपाःकेचिदभावरूपाउभयेषामपिगुणत्वंयुक्तं॥नाहिकाणादत्तंत्रद्रव्यगुणत्वं॥भावत्वनियतमलं
कारशब्देसंज्ञाप्रतिपन्नं॥उपस्कारकत्वमात्रेणगुणत्ववादात्॥तत्रार्थप्रतिपादनेलक्ष्यस्यनिराकांक्षत्वेनप
रिपूतोंझटित्यवबोधकत्वमर्थव्यक्तेः॥इयंप्रसिद्धार्थवस्तुरूपप्रसादान्नातिरिच्यते॥विकटाक्षरबंधत्वमोदा
र्येश्लाघ्यविशेषेणयोगउदात्तता॥गाढबंधत्वमोर्जस्वं॥एतेत्रयओजस्यंतर्भूताः॥परिपाकवत्यक्तिःप्रौढिः॥
विदग्धभणितिरुक्तिः॥संक्षेपेणार्थस्योक्तिःसंक्षेपः॥अनेकार्थशब्दोक्तिःसौक्ष्म्यं॥उक्तार्थसमर्थनोक्तिःसुकर
यावदर्थपदोक्तिःसंमितत्वं॥प्रियतरवस्तूक्तिःप्रेयान्॥अवैषम्येनपादचतुष्टयेप्यर्थकथनंसमता॥एषाम
ष्टानामुक्तिरूपत्वाद्वैदग्ध्यवदुक्तिरूपगुणेतर्भावःइत्यष्टानामेकत्वं॥अन्यधर्मस्यान्यत्रारोपणंसमाधिः॥अ
स्यारोपगर्भेषुरूपकादिष्वंतर्भावइतिनगुणत्वं॥अनेकपदानामेकपदप्रतीतिविषयत्वंश्लेषः॥अयंतुशब्द
श्लेषेंतर्भाव्यतइतिनगुणः॥बंधोज्ज्वलताकांतिः॥शब्दसाधुत्वंस्फुशब्दता॥गांभीर्यंगूढार्थत्वंभावाद्याक्षिप्तिः
स्वाभाविकं॥प्रक्रमनिर्वहणंरीतिः॥एतेपंचाविष्टयगुणाः॥सानुस्वारकोमलवर्णतासुकुमारता॥इयंमाधुर्ये
तर्भूता॥ततश्च॥ओजःप्रसादमाधुर्यगुण्युक्तिकांतिस्फुशब्दताःगांभीर्यभाविकरीतिमूचुःकेचिदुगुणानवातत्रकी
र्तिर्यथा॥ताराहारहराचलांबरसरिन्नीहारहीरामराहारासारपटीरसोदरकरान्यत्कारभारोधुरांकीर्तिर्का
र्तिकचंद्रमूर्तिर्विजयस्फूर्तिस्त्वदीयागुणारामश्चारघुरामकामकरोद्दीप्रादिशःप्रायशःरीतिर्यथाकल्याणदे
लिकलनाकविकोविदानांकोतूहलंकिमपिकंजविलोचनानां॥कीर्त्यद्रुमःकमलकांतकुलोद्भवानांकस्योत्सवं
नकुरुतेभुविकोसलेंद्रः॥अत्रप्रकांतेककारस्यपुनःपुर्ननिर्वहणाद्रीतिरीतिःउक्तिर्यथामंदोदरीविलो
चनबाष्पोत्कटदृष्टिपूर्वदिग्वासाक्षोणानग्नंकरणक्षरप्रदीप्राप्रतिभातिकापिकला॥अत्रनामग्रहणमकृत्वा
पिरामप्रत्यायनेनवैदग्ध्यप्रकटनाद्वक्तिःभाविकंयथाअसारंसंसारंजाहिहिविरसारंभवदुलंममभ्रा

तश्चेत:परिचिनुवचोत:परमिदं॥महोदारेधीरेभुवनभरधोरेयविभवेगुणारामेरामेदशमुखविरामेकुररतिं॥अत्रा
भिमतार्थप्रवर्तनीयेचेत सिप्रियरूपभावनावशात्भ्रातरिवाग्रतिरितिभावेकंगांभार्यंयथाप्रायेणमार्गणेरामोना
मरारीनमामरतुच्छितांगान्मकरोकिंतुपलायनपरायणान्अत्रनिजकुलकूटस्थस्यमार्तंडस्यमुहुर्मुहुर्मे डलभे
दोमाभूदित्यभिसंधानात्मकस्यामरद्विषदमारणकारणस्यार्थस्यगूढता हांभार्यंउक्तोदाहरणान्नेवसोशब्दस्यो
दाहरणानिदृष्टव्यानि॥एवंसस्मधियांमार्गमाश्रित्योदाहृतंमयामाधुर्योज: प्रसादास्तुसोशब्दश्लेनसमन्विता:
गुणाश्चतारएवेतिममसस्मतरोक्षितु: त्रयएवेतिवास्यर्थंमनसेरोचतेमतं॥ ॥इतिश्रीभुवनपवित्रहरिनगोत्रा
वतंसवाराणसीवंशप्रभाकरप्रभातभानुनापदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायपर्वतनाथास्रिसनुनाश्र
यश्लमांबागर्भरत्नाकरपारिजातेनचतुर्दशविद्याविभूषणवताश्रीधर्मसंरब्धावतावरिचितेश्रीमद्रघुकुलतिलक
यशोधनसारसारस्करभीकृतेसाहित्यरत्नाकरनामन्यलंकारशास्त्रेगुणनिरूपणंनामपंचमस्तरंग:॥ ५ ॥
धर्मावर्णानिवर्यस्त्रिभुवनविदितेवारणास्यन्वयेय:संजात: पर्वतेशात्सुभगुणगणभूर्यश्लमांबास्करगर्भेकाव्यालंका
रकृच्छस्फातिरविशतकोन्नाटकादिप्रणीतु:॥तस्यालंकारशास्त्रेरघुपतिविभुकेपंचमोयंतरंग:॥ ७ ॥ ७ ॥
अथालंकारानिरूप्यंतेतत्रालंकारसामान्यलक्षणंप्रागेवावादिष्म:॥तेचालंकारा:द्विविधा:॥शब्दगता:अर्थगताश्च
तत्रार्थप्रतीतेशब्दप्रतीतिपूर्वकत्वात्प्रथमंशब्दालंकारानिरूप्यंते॥द्वयोर्द्वयोर्व्यंजनयो र्युग्मयोर्यानिरंतरा॥आ
वृत्ति:श्रूयतेसोयंछेकानुप्रासईरित:॥छेका:विदग्धा:तदभिमतोनुप्रासइत्यन्वर्थसंज्ञायथाराजराजसमेश्वर्य:
शास्त्रभास्करधीरर्ये:राजराजद्यशारेजेरामोदाशरथीरथी॥एकद्वित्र्यादिवर्णानांपुनरुक्तिर्भवेद्यादिसंख्यानियम
ममुल्लंघ्यवृत्त्यनुप्रासईरित:॥तत्तद्रसोचितवर्णविन्यासात्मिकावृत्तिरुपलक्षितत्वात्तद्वृत्त्यनुप्रासत्वं॥अ
त्रपूर्वत्रचस्वरसादृश्यमानुषंगिकंस्वरव्यंजनसमुदायसादृश्यस्यतुयमकत्रयोजकत्वंवक्ष्यते॥यथाममे
वक्रच्छानदीस्फुरतो॥रुच्छामुच्छातुनिच्छास्वभिजनवृजिनान्याशुदुर्वारवारावाराशेरादिदारारुचिरुचिरहीने
नभेनाभकेना॥शुभ्राशुभ्राभ्यदूर्मिभ्रमकरमकरग्रामणिग्रामनीडगाधागाधारोधोविवरभुविवलधीव
रोधावरोधा॥यथावायुधश्रधासमिधप्रथमाविगणनासिध्मूर्धन्यभूषायोधाब्धाधिबोधारघुधरणि

BHAU DAJI MEMORIAL

भुजाछिन्नदोस्कंधबंधा:॥लंकालंकारभूतादिविजविजयिनोराक्षसारूक्षसाराहंताहंतामहांत:समरसमरसा:ये
ततांत्राणितास्ते॥अहंतयाअहंकारेणमहांत:अत्रप्रथमार्थएकवर्णावृत्ति:तृतीयतुरीयचरणयो:द्वित्रिवर्णा
वृत्ति:॥तात्पर्यमेवाभिन्नंस्यान्नतुशब्दार्थमोर्भिदा॥तयोर्यापुनरुक्ति:सालाटानुप्रासउच्यते॥यथा॥मंदारो
मंदार:सिंधु:सिंधु:॥द्यमेरुरपिमेरु:॥औदार्येणगांभार्येधैर्येचनराघवेणतेतुल्या:यथावादिग्पालादिग्पाला
भूपाला:सांप्रतंहिभूपाला:॥त्रैलोक्यहृदयश्ल्येरघुकुलतिलकेनरावणेनिहते॥पुनरुक्तवदाभासतियत्रार्थो
नतुतत्वत:॥पुनरुक्तवदाभास:सनामाख्यातगोद्विधा॥नामगतोयथाकृष्णच्युतपुरुषोत्तमचतुराननवा
ग्धीशालोकेश॥सर्वज्ञेश्वरशंकररामश्रीरामपालयक्ष्मोणिंश्री:रामायस्यतस्यसंबुधि:॥श्रीरामभ्रमरा
लिसदृशकेशोदारथिर्भातिभुवनजीवनद:॥सायकत्रारेषभिद्दोहरिहयगंधर्वतुरगमुखकालित:॥आ
ख्यातगोयथाराजतेद्रोस्फुरद्धाम्नोवश्रियमाहस्वराजते॥राजतेजोनिधेकीर्तिस्त्रैलोक्येरघुराजते॥आव
र्त्यतेर्थभेदेनसस्वराव्यंजनावली॥यदातदास्याद्यमकंबहुधाद्यंतमध्यगं॥स्वरव्यंजनसमुदायस्यसादृ
श्यग्रथनेयमकंतदाद्यंतमध्यगतत्वेनपादार्धश्लोकगतत्वेनचबहुविधं॥तत्रादिङ्मात्रमुदाह्रीयते॥
अर्थिनोरामभवत:प्राप्तानेकपराजय:॥प्रस्थश्चाभवद्युधेप्राप्तानेकपराजय:॥१॥जनस्थानंवनेराम:रव
रदूषणवर्जितं॥राज्यंचकेस्थितोराज्येखरदूषणवर्जितं॥२॥अत्रराज्यपक्षेखरेत्यत्ररलयोरभेद:॥खला:
पिशुना:॥पूर्वश्लोकेप्रथमैकवचनबहुवचनयो:श्लेष:॥दधत्सरामोयुधिभूरिपोरुषंचकारभूमेरधिभू
रिपोरुषं॥विहायगोष्ठीमितरांरसादरंव्यधत्ततस्मिन्नितरोरसादरं॥३॥अत्रपूर्वोत्तरार्धयो:षट्षडक्षरा
णामावृत्तिरिति॥भूमेरधिभू:नायक:॥भूरिमहत्पोरुषंदधत्सराम:रिपोरोषंचकार॥रसाभू:इतरांश्चो
षादिस्थितरूपांगोष्ठींविहायअरंक्षिप्तंरसादनुरागात्तस्मिन्नादरंनितरांव्यधत्तेतिसंबंध:॥चकाद्याकारा
रमापन्नावर्णाश्चित्रमुदाहृतं॥तद्भेदाएवनिष्कृष्यनिरूप्यालक्ष्यादयोमता:॥अत्रप्रथमादिशब्देनगोमूत्रि
कापद्मादय:संगृह्यंते॥द्वितीयादिशब्देनानिर्देश्यानिरूप्यांतर्लापिकादय:॥ननुकथमस्यशब्दालंका
रताचक्राद्याकारतायारेखोपरेखानिष्ठत्वात्॥सत्यं॥वर्णानुमापकरेखानिष्ठानामाकाराणामनुमेय

निष्ठत्वाख्यवसायादोपचारिकीयंशब्दालंकारतावाचोयुक्तिरितिवदामः॥ तत्रचक्रबंधोयथा॥ दर्पाधप्रसरा
स्करस्थिरमदप्राणप्रहारिक्रियोविष्णुर्सन्मथमन्मथस्थिरशिवंभनुक्षपाकृत्प्रभाः॥ दत्तांस्तन्वतगुर्विपक्षर
विधस्फातिःप्रहेतिःपरंरम्योमेदयायाविराधदमनोयोगींद्रभाव्यश्चिरं॥ भानुक्षपाकृत्प्रभाद्वतिसकारांतत्रथमेक
वचनं॥ स्तन्वतगुः सत्यवाक्विबुधराधभाआपन्निवर्तकत्रकारास्फातिः॥ स्फुरणंयस्येतिविग्रहः॥ योगींद्रेर्ध्येयः
स्थिराशिवंस्थायिमंगलंविराधासुरहंतामेदतामित्यन्वयः॥ अत्रतृतीयेवलयेधर्मसूरिकृतिःषष्ठेरामगुणनु
तिःअष्टमेरथपदबंधइतिचप्रतीयतेवयोरभेदात्अत्रबंधानांउद्धारक्रमाःविस्तृतिभयान्नालिख्यंतेगोमूत्रि
काबंधोयथासुरगाचमणिःश्यामःस्थिरावरसुतापतिःविराजघृणीरामःसुरासुरकृतानतिः घृणीशब्दःईकारां
तःस्थिराभूमिः घृणीदयावान्नागबंधस्तत्स्तामिःसूर्यशतकोबिंबवर्णनेकथितःबिंबधांतव्याथादंकनकधर
शिरश्चारिशोणद्युदानंपद्माधिप्रेमसोमक्षतदमुरुमुदःकर्तृकव्यूहहारिः॥ शेषुष्यादात्दैत्याधिपतुदतुलकर्मा
मयादानाकल्प्यांकस्येहक्षीणतामुत्सिपतुपटुतरंदेवमार्चिःकदंबं॥ पद्मेषाधिकंप्रेमयस्यतत्तआकव्यूहंजलव्यूहं
हरतीतितत्तथादैत्याधिपान्लुदतीतितत्तथाभतुलंकर्मयस्यतत्तआकस्यसूर्यस्याशिष्टंस्पष्टं॥ अष्टदलपद्मबंधस्त
त्रैवअश्ववर्णनेगदितःयादासत्राणरक्षातातिदिनहरितांज्ञाभिनव्यास्तमायायामास्तव्यानभिज्ञानवतुमकर
तग्राममश्वारजेमायाजेरश्रीसमग्रायदरितातिरसक्षासरज्ञाजरायायाराजज्ञारसक्षानिशामियमघसुक्षारण
त्रासदायाः॥ अत्रयोतिप्रतिविशेषणंसंबध्यतेज्ञाभिनव्याद्यैर्विहृद्रि। रभिनव्याअभिष्टोतुमर्हाअस्तमायाअस्ता:
मायाःपरकीयाःययासातथोक्तामास्तव्याश्रीस्तत्यायदरितातिःयद्रिपुपंक्तिःअश्रीसमयाशिवपूर्णाभवतीतिरो
षःराजज्ञारसक्षालालितगतिपराअद्यमुक्षाक्षअसरदित्यन्वयः॥ क्षुनहरितांसूर्यश्वानांपंक्तिःअनभिज्ञान्मं
दान्वातीत्यर्थः॥ शिष्टंस्पष्टंषोडशदलपद्मबंधोयथा॥ मलीमसमतिंमर्त्यमवमत्यमहामहं॥ मनामरामम
मलमहोमयमनामयं॥ मुरजबंधोयथा॥ रामभास्करभावर्ण्यनामभातिस्वभावतः॥ तवभास्वरभावस्थंदेव
भास्करभावद॥ भास्करभाभिर्निर्मलज्ञानेर्वर्ण्यभास्वरभावेषुश्रुत्यमनस्केषुतिष्ठतीतिभास्वरभावस्थंमु
मुक्षुभिःस्मर्यमाणंइत्यर्थः॥ भास्वरभावदतेजस्विन्दाशिष्टंस्पष्टं॥ सर्वतोभद्रबंधोयथा॥ शोधीसोममसोधीशो

धीरसाररसारधीः॥ सोभावनानावभासोममतोननतोमम॥ शोधयितुंशुद्धयितुंशीलमस्येतिशोधीभक्तपावनस्त्
स्यार्थः सोमेनमस्यतइतिसोममसः शिवेनपरिछिन्नइत्यर्थः मसपरिमाणइतिधातुः धीरसारः पांडितश्रेष्ठः र
सारधीः सारेलवत्सरसरोमुषीकः रलयोरभेदात्पश्चाद्वृद्धिःशोषणसमासः अभावनमाअसमाधिनानावभा
सोनव्यक्तइतिअभावनानावभासः ध्यानेकगम्यइत्यर्थः ममतयाममकारेणजुनैः शून्यैःनतःसःप्रकृतोराम
ममाधीशः यद्वाधीबुध्योशेतइतिवाधियंशयतीतिवाधीशः बुधिप्रवर्तकइत्यर्थः॥ खड्गबंधोयथा श्यामंमामना
मभीमभूमधामधामयंयंत्रितासुरासुरामनामराजदोजसा॥ सारसारसस्यहास्यदास्यमाश्रयद्यंयंतम
त्रितंत्रिलोचनस्यशास्यमंजसा॥ छुरिकाबंधोयथाहारेहीरवरस्तंभाभूरिभूभागभोगभा॥ भासतेविभुरामेशा
शंमेराभुवितेसभा॥ शमेराशांतेर्भूमिःस्थानंसंसारसंतापोपशमभूमिरित्यर्थः॥ हलबंधोयथा॥ वितथेतर
नारावचरानारतमभ्रमः॥ मन्मानसेरघुपतेधीरसाररसारधीः॥ अभ्रमः भ्रांतिरहितः चापबंधोयथासी
तापतियशोलेशोजितवादिक्षत्तिोष्टसत्॥ कुंदचंदननीहारशीरपाणिद्युपादपान्गुल्छबंधोयथाहार
हीरहरस्फूर्तिमूर्तिकीर्तिपुरसर॥ शरवीरपरक्रूरदानवोन्मदनक्रमः मत्स्यबंधोयथा॥ राघवाग्निभिया
भिन्नासिंधुबंधुमविंदतत्तदप्यजीवनवतीपरवीरचमूरभूत्॥ एकाकुंसर्वलघुनिरूक्षंचयथा॥ रणचण्ड
शगलगलगहनदहनसरलशरअमरलनतरतनयजयजयदशरथतनयजलजदलनयननिस्तालबंधथा
वक्षधानग्नकरणारखंडसकोदंडकांधेउरपाणेगोतमसक्षभगंकरणद्रुतपदरेणोननोस्कपुरुषमणेः॥ निष्कुंख्यंय
थाएष्यीपुत्रीशतुर्मूर्तिःश्रुतिःस्मृतीनांनिधिःशुचिः॥ निरीतिर्युधिनभीतिःविष्णुश्रीलविभूतिधत्॥ निर्दंत्यंनिर्मू
र्धन्यंनिरंतरस्थंनिरूष्ठ्यंकंचयथाकेकिकचाकोककुचामंजुभुजाकापिकापिकामाज्ञा॥ कंजमुखीकुंभिगमाब
भोखगांकांकभागपंकजगद्यक्षरंयथानानादानानिदीनानांददानोनंदनंदनः॥ नदीननांदीनानंदीत्तुदेदेनो
दिनेदिने॥ एकाक्षरंयथाकोकीकंकीकोककंककाकोकुकाकिकाः॥ कोकांकिकांकांकिकाकुकाकुकेकांककेकिकाः॥ कोकीनांचक्रवाकीनांकंकीनांकोककंकानांककाकानांजलचाकनांचओकः आश्रयभूताद्दंकोकाद्
ग्रहणंहंसादीनामप्युपलक्षणंपुनः कथंभूताअकुकाकिकाकुकाकुत्सितवायवःतत्कृतंभकंदुःखंकुकाकं

तद्यस्यांनास्तिसाअकुकाकातत्तुस्वार्थेकप्रत्ययःप्रत्ययस्थादित्यादिनाकात्पूर्वस्येकारःअकुकाकिकाद्दयानंदगं
धवाहांस्यंदनवतीत्यर्थः॥कोकांककाकाकः सूर्यः ओः शंभोकंशिरस्ताभ्यांकोकाभ्यांसकाशादंकंविनिर्गलितं॥अं
कगतिलक्ष्मणोरितिधातुः कविकल्पद्रुमकारणोक्तोद्रष्टव्यः तथाविधंकंजलं॥गंगायमुनात्मकंअंकंचिन्हंयस्या
साकोकांककाकाकुकेकांककेकिका॥कांकवःशोकभीत्यादिकृताध्वानोविकारातेस्तद्रूपाध्वनयोःलक्ष्यंते॥ताश्च
केकाश्चअंकायेषांतेकेकिनोयस्यासातत्कप्रत्ययादिपूर्ववत्॥काकुकेकांककेकिकाएवंविधाकाचित्कुःद
ष्टाअंकिअगामि॥अत्रारामेणेतिप्रकरणाल्लभ्यते॥सर्वश्लोकयमकंयथा॥ससारसंपन्नतमोहितेषुससार
संपन्नतमोहितेषु॥ससारसंपन्नतमोहितेषुससारसंपन्नतमोहितेषु॥१॥पदोःपदयोर्नतामालक्ष्मीर्य
स्यसःपन्नतमःलक्ष्मीसेवितपादइत्यर्थः॥सरामःससारसंपन्नतमोहितेषुससारयासबलयासंपदाकरिनु
रगादिसंपत्स्यानताऽकरामोहिताःमोहंप्रापिताःशारीरबाह्यबलाभ्यांऽधताअमंदाश्चेत्यर्थःतेषुतथाससा
रसंपन्नतमोहितेषुससारतमेःसत्ववस्तमेःसंपन्नतमेःप्रभूततमेश्चपुरुषांतरेःऊहिस्तर्कितःश्लाघ्यमाना
इत्यर्थःतेषुतथासंपन्नतमोहितेषुसंपन्नंपूर्णंतमस्तमोगुणोयेषांतेसंपन्नतमसःतेहितायेषांतेभ्योहिता
इतिवातेष्वहितेषुशत्रुषुसारसंअरसोरागाभावस्तेनसहितंसरोषंयथातथाससारशत्रून्जेतुंयथाविद
र्थः॥एवमन्येपिशब्दालंकाराद्रष्टव्याः॥इतिश्रीमन्निभुवनपवित्रहरितमुनिगोत्रावतंसवाराणसीवंशप
द्माकरप्रभातभानुनापदवाक्यप्रमाणपारावारीणश्रीमद्दोपाध्यायपदवेतनाथपंडितमंडलेश्वरसूनु
नायल्लंबागर्भरत्नाकरपारिजातेननिर्मलाचारपूतेनचतुर्दशविद्याभूषणवताश्रीधर्मसंरब्धवताविर
चितेश्रीमद्रघुकुलतिलकयशोधनसारसारसरभीकृतेसाहित्यरत्नाकरनामन्यलंकारशास्त्रेशब्दा
लंकारनिरूपणंनामषष्टस्तरंगः॥ ६ ॥धर्मोतर्वाणिवर्यःस्त्रिभुवनाविदितेवारणास्यंन्वयेयःसंजातः
पर्वतेवाल्लुभगुणगणभूर्यल्लुमांबासकगर्भे॥काव्यालंकारकृछास्त्रातिरविचातकोन्नाटकादिप्रणेतुस्त
स्यालंकारशास्त्रेरघुपतिविभुकेषष्टउच्चैस्तरंगः॥ ६ ॥अथअर्थालंकारान्निरूपयिष्यन्नादौउपमां २०
लक्षयति॥साधर्म्यंलोकसिद्धेनभिन्नेकविसमतंयदेकवाक्यवाच्यंस्यात्सकृतस्यतदौपमारूपशब्दालंका

रेषुचप्रातिस्विकलक्षणेरेवसजातीयविजातीयव्यावृत्तिव्यवहारसिद्धेःनसामान्यलक्षणापेक्षेतिविशेषलक्ष
णानामेवोक्तिः इहकेचित्तुउल्लेखादयोलंकाराःअध्यवसायमूलाःविभावनादयोविरोधमूलाःपरिसंख्याद
योन्यायमूलाःपरिवृत्तादयोलोकव्यवहारमूलाःतर्कन्यायमूलाःकाव्यलिंगादयःशृंखलावेचित्र्यमूलाः
कारणमालादयःअपन्हवमूलाःव्याजोक्त्यादयःविशेषणवैचित्र्यमूलाःपरिकरादयःसाधर्म्यमूलाःउ
पमादयःतत्साधर्म्यंत्रिविधंभेदप्रधानंअभेदप्रधानंभेदाभेदप्रधानंचेतितत्रभेदप्रधानसाधर्म्यगर्भाःव्यति
रेकादयःअभेदप्रधानसाधर्म्यगर्भाःरूपकादयःभेदाभेदप्रधानसाधर्म्यगर्भास्तूपमादयःअतएवउपमा
मूलस्यसाधर्म्यस्यबहुव्यापित्वाद्भेदाभेदोभयप्रधानत्वाच्चउपमायाःप्राकूनिरूपणंजिज्ञासासंगत्योत्तरत्रचे
टिकासंगत्यर्थंलंघनंनदोषमावहतिलाघवादिति॥प्रकृतस्यवदनादेःततोभिन्नेनराकाशशाकरादिनालोक
सिद्धेनचेत्कवाक्यप्रतिपाद्यंकविसमयसंमतंकांतिमत्त्वादिभिःयत्साधर्म्यसमानधर्मसंबंधःसोपमात
त्रलोकसिद्धपदेनउल्लेखाव्यवच्छिद्यते॥तत्रउपमानस्यकविप्रौढोक्तिभिन्नपदेनअन्वयालंकारनि
रासःतत्रएकस्मैवउपमानोपमेयभावालिंगितत्वात्वाच्यमिलनेनगम्योपम्यरूपकादिव्यवच्छेदःकविसं
मतमित्यनेनकुसुदमिववदनंकारणमिवकार्यमित्यादीनांहीनोपमादीनांचनिरासःनहितत्रोपमानोपमे
यभावःकविसंमतः। नचकार्यकारणयोःसाधर्म्यमेवनकारणगुणाहिकार्यगुणानारंभंतइतिन्यायेनत
त्रापिसाधर्म्यसंभवात्तच्चसाधर्म्यंकविसमयसंमतैरेवकांतिमत्त्वादिभिःस्वीकरणीयं।अभिधेयतया
विभातिकांतेवदनंतेशशांकवसुधाभानुःअपिस्कंदारविंदेकवधूस्तेदरहासस्तवसतथाप्रकर्षेइत्यादावुपमा
नोपमेयभावोसंनेहृदयहृदयाह्लादायएकवाक्यवाच्यमित्यनेनउपमेयोपमालंकारव्यावृत्तिः। तस्यवा
क्यद्वयगोचरत्वात्तच्चएकेनैवश्लिष्टेनाश्लिष्टेनवापदेनोपादेयंश्लिष्टोपादानेपिनश्लिष्टशंकानंकःस्वतो
भिन्नयोरपिधर्मयोःश्लिष्टपदादानेननभेदेसत्यभेदरूपातिशयोक्तिबलादेकत्वापन्नयोस्तथाउभयानुगते
कधर्मत्वेनांगत्वात्। तथाचएतादृशस्यश्लेषप्रतिबोधापितअतिशयोक्त्यनुप्राणितोपमेत्यर्थः॥
तांविभजते। पुर्णलुप्ताभ्यांसापिद्वेधापुनर्भवेत्॥उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानां

चतुर्णांप्रयोगेपूर्णा एतेषांएकाहित्रिलोपेलुप्ता। पूर्णाविभजते। श्रौत्याश्रौतिद्विधापूर्णासाक्षात्सादृश्यवाच
कयथेवादीनांप्रयोगेश्रौतीधर्मिव्यवधानेनतत्प्रतिपादकानांनिभसंकाशादिपदानांप्रयोगेआर्थी।अन्व
र्थं चेतेसंज्ञेनन्वयथेवादिशब्दानांउपमानविशेषेणतयानसादृश्यप्रतिपादनपटीयस्त्वमिति चेत्मैवंश
ब्दशक्तेस्तादृशत्वात्॥ यथा॥ राजशिरोगतापष्ठापुरुषमाक्षिपंतीतदुभयनिष्ठसंबंधबोधनेहिनपर्यनु
योगर्हीतथाप्रयोगेपिवतोतुविशेषः तत्रतस्थेवेतिसूत्रोक्तवतिः साक्षात्सादृश्यप्रतिपादकः इवार्थत्वात्
तेनतत्रैवश्रौतीतेनतुल्यमित्यत्रवतिस्कल्पत्वंप्रतिपाद्यतेनिर्वाहायसादृश्यमाक्षिपतितत्रार्थेवतांपुन
र्व्यभजते॥ द्विधापिसापुनस्त्रिधा॥ वाक्यसमासतद्धितगतत्वेनत्रिविधासतीपूर्णोपमाश्रौतीआर्थीचभ
वतीतिषट्प्रकाराक्रमेणोदाहरणानि॥ वर्षाबद्धदुवाहिनीजुषिरणक्षोणीरचूर्णांप्रभोः मूर्तिःसंभृतसर्वतो
मुखबलोबिभ्राजतिस्माभवत्॥ तस्मिंहुंधानिरस्यगर्जितमिवप्रादुर्बभूवोज्जितदैत्यैद्वैः हरिभिःयथाटथुव
लैः श्रोत्रियोभिः शुभ्रुवे॥ वाहिन्यः नद्यः सेनाश्वसंभृतसर्वतोमुखबलराममूर्तिपक्षेसंभृतंसर्वतोमुखंसर्व
पथीनंबलंसैन्यंसारोवायत्रासातथोक्तामेघपक्षेसर्वतोमुखंजलंतदेवबलंतत्संभृतंयत्रासातथोक्तावर्षावत्
वर्षास्विवाभ्रवत्अभ्रस्थेवेतिविग्रहेतत्रतस्थेवेतिविभक्तिलुप्तार्थेविहितवते
रिवार्थत्वात् छौतत्वंगर्जितमिवेत्यत्रसमासगतादृवेनसहानित्यसमासस्यवक्तव्यबलेनसिध्यत्वात् हरिभिः
यथेत्यत्रवाक्यगताअत्रतद्धितगतयोः उपमयोः वाहिनीसर्वतोमुखशब्दश्लेषप्रतिभोत्थापितातिशयोक्त्यो
श्चअनुग्राह्यानुग्राहकभावेनसंकरः दोर्दंडस्तवकुंडलेत्रभुनिभः श्रोत्खंडवान्हिंडतेश्रीखंडद्रवच
र्चिकाजयतितान्निर्मोकवान्निर्मला॥ तत्कोक्षयकबल्लरीचतरलश्यामातिभीमाकृतिर्दरश्रीरघुरामतद्दसन
यासंशोभतेसानिभाकुंडलेप्रभुनिभइत्यत्रसमासगताआर्थीपूर्णोपमातान्निर्मोवतइत्यत्रतद्धितगतातेनतुल्य
मित्यादिनातुल्यार्थवतेर्विधानात्तद्दसनयानिभेत्यत्रवाक्यगताएवंश्लोकद्वयेपूर्णश्रौतार्थोपमाः षडप्युदा
हृताः लुप्तांलक्षयित्वाविभजतेधर्मादिलोपेलुप्तास्यात्प्रथमंसप्तधावसा॥ लुप्तातुधर्मलोपेउपमानलोपे २१
वाचकलोपेधर्मवाचकलोपेधर्मोपमानलोपेवाचकोपमेयलोपेधर्मवाचकोपमानलोपेचभवंतीप्रथमंसप्तवि

धाभवंतिधर्मलोपवतीतासुश्रौताथीतिद्विधाभवेत्॥ समासादित्रिगात्वार्थीश्रौतीवाक्यसमासगा॥ श्रौतीतद्धित
गतानसंभवतिद्वार्थेविहितस्यवतेः सत्वेपिधर्मानुपादानेअसंभवात्तादितरस्यकल्पत्वादेरिवार्थेविधानाभावा
च्चएवमनुपातधर्मोपंचप्रकारायमालंपारिजातद्वराजसिरामबाहुदंडौचकांडसदृशौतानिरंगुलीनां॥ तुल्या
प्रवालपटलेनयथाग्रतोमुक्तालतास्मितमुदंचतिपुष्पकल्पं॥ अभीष्टदातृत्वादिधर्मानुक्तेरियंलुप्ताअत्रपा
रिजातद्वेत्यत्रश्रौतीसमासगतायथाग्रतः वाक्यगतावादर्शिताआर्थीतुकांडसदृशावित्यत्रसमासगताप्र
वालपटलेनतुल्येत्यत्रवाक्यगतापुष्पकल्पमित्यत्रतद्धितगतेतिविभागः लुप्तोपमासाद्विविधावाक्यगाचसमा
सगायथावीराः परेपरिवृताश्चतुरंगसैन्यैः शत्रून्जयंतिनजयंतिनवाम्रियंतेएकस्त्वमेवबहूनवधीः खरादी
न्वीरंरघूद्वहसमंभवतानविघ्नाः ४ लोकेवीराः केचिच्चतुरंगसैन्यपरिवृतावाशत्रून्जयंतिअन्येपराजयंतेअ
परेस्वयमेवम्रियंतेतंत्रलोकिकः यतः एकोसहायोवधारेवत्वमेवनत्वादृशोन्यइतित्रिविधवीरेभ्यः प्राकृतेभ्यो
अतिशयोदर्शितः शत्रवश्चस्कबहवश्चतुरंगसहस्रसंख्याकाः तेचखरादयः आदिशब्देनप्रकारवाचिना
खरतुल्यपौरुषाएवसर्वेपुरुषादाइतिध्वनितंद्यंलुप्तालुप्तोपमानावाक्यगतानात्वियंलुप्तगुणावीरमिति
पदेनगुणोपादानात्वीरंरघूद्वहभवत्सदृशंनविघ्नइतिपाठेत्वेषेवसमासगाभविष्यतिअनयोश्चनोपमान
स्वरूपप्रतिषेधः क्रियतेकिंतूपमानदर्शनमेवनिषिध्यतेतेननान्वयारंभतेः कार्याभवेद्वाचकलोपेवालुप्तासा
षड्विधामता॥ समासेकर्मण्यचिआधारण्यचिक्यङि कर्तरणमुलिकर्मणमुलिचभवंतीलुप्तावाचिकलुप्तोपादाभव
तियथा॥ वीरश्रीरघुरामतावकधनुर्धाराधरोदंचितादृष्टिः कांडमथायुगांतविगडुत्सर्जन्यभीमातव॥ क्रोधंपूर्वस
मीरणीयातिगणेतेजस्विनांवैरिणामंगारीयातिकिंचवर्त्ममरुतामिंगालजालायते ५ इहपर्जन्यभीमेत्यत्रउपमा
नानिसामान्यवचनैरितिविहितेसमासेपर्जन्यइवउदारेतिवाचकलोपवतीपूर्वसमीरणीमतीत्यत्रपूर्वसम
रणमिवआचरतीतिविवक्षायांउपमानादाचारइतिकर्मणिक्यचोविधानात्लुप्तावाचकलोपवतीअंगारीयतीत्यत्र
अंगारेष्विवाचरतीतिविवक्षायांअधिकरणाच्चेतिवक्तव्यमितिवचनादधिकरणार्थकक्यचिवाचकलोपव
तीइंगालजालायतेइत्यत्रइंगालजालमिवाचरतीतिविवक्षितेकर्तुः क्यङ् सलोपश्चेतिविहितेक्यङिवाच

कलोपवतीचंडीशकांडासनमिक्षुकांडभंजंखभंज्याद्भुतबाहुदंडःरामस्यसीताचपुलोमपुत्रीचारंचचारेंद्रस
मेचतस्मिन्नअत्रेक्षुकांडभंजमित्यत्रेक्षुकांडवद्दृढः खेतिपुलोमपुत्रीचारमिवेत्यत्रपुलोमपुत्रीवाचरित्वाद्दृ
तिचविवक्षितेणमुलिवाचकलोपवतीउपमानेकर्मणिचेतिस्त्रेणकर्मार्थेचशब्दात्कर्तरिचणमुलोविधानात्॥
धर्मवाचकलोपेनलुप्ताक्ति द्वासमासगा॥धर्मोपमानलोपेतुवाक्यगाचसमासगा॥ यथापश्यंतियेरामसुखे
न्दुबिंबंदुःखानितेषांतिमिरंतिसद्यः॥चिरंचरंतोपिनतेनतुल्यंकुत्राप्यहोसंप्रतिसंप्रतीमः॥७॥अत्ररामसुखेंदु
बिंबमित्यत्ररामसुखमिंदुबिंबमिवानंदकरमितिउपमितंव्याघ्रादिभिःसामान्याप्रयोगद्दत्युपमितसमासेध
र्मलोपवती॥तिमिरंतीत्यत्रतिमिराणीवाचरंतीतिउपमानादाचारद्दत्यधिकारेसर्वप्रातिपदिकेभ्यःक्विब्वक्तव्य
द्दतिवचनात्क्विपितस्यसर्वापहारिणिलोपेचसतिसमानधर्मस्याचारस्यवाचकस्येवशब्दस्यचलोपादियंलुप्त
धर्मवाचकवती॥विशेषतोधर्मानुपादानाच्चननुलुप्तप्रत्ययाप्रकृतिःप्रत्ययार्थमपिब्रूतइतिन्यायेनक्विब्लोपे
पिप्रकृतिमाहित्वेवआचारस्यगम्यमानत्वात्सतिसदृशधर्मेकथंलुप्तधर्मादितिचेत्सत्यंतथापिवाचकप्र
त्ययलोपाद्वाच्यलोपइतिउपचर्यतेअथवाप्रकृतिव्यतिरिक्तस्यधर्मवाचिनोलोपाधर्मलोपइत्यदोषः॥उक्त
मर्थेसमानधर्माणंउपमानस्यवानुपादानाल्लुप्तधर्मोपमानावाक्यगतानतत्सदृक्षमितिपाठेसेवसमासगा॥
वाचकेचोपमेयेचलुप्तायासैकधामता॥सर्वेष्वपिचलुप्तेषुत्रयाणामेकधामता॥यथाग्रहीतुंसंयङ्हनेकुमा
रातिभ्रमंतिद्विरदेंद्रसाराःतदारघूणांप्रवरस्तबाणाकंठीरवीमल्लयिवाकृपाणः॥८॥अत्राद्विरदेंद्रस्यसारइव
भूरिःसारोयेषामितिसप्तम्युपमानपूर्वस्यबहुव्रीहेर्वाचोत्तरपदलोपश्चेतिवचनेनसमासेसतिलुप्तवाचकध
र्मोपमानाकंठीरवमिवात्मानमाचरतीत्यत्रोपमानादाचारइतिक्यचिलुप्तवाचकोपमेयाश्रेया॥एवमेकोनविंशा
तिर्लुप्तभेदाःपूर्णाभेदैःषड्विंसहपंचविंशतिरुद्दाहृताः॥एकस्येवोपमेयस्यानेकोपमानोपादानेमालोपमा॥य
था॥नद्यःसमुद्रमिवरश्मिगणाद्रविंकुमुदाकरमिवाब्जिनदशाद्रवेंद्रं॥रामंस्त्रियोलोकजनतानयनाभिरामंका
मंभजंतिकमनीयगुणौघाःद्वयंचोपमावस्तुप्रतिवस्तुभावेनवाबिंबप्रतिबिंबभावेनवासंभवतिएकस्ये २२
वधर्मस्योपमानोपमेयगतत्वेनपदद्वयेनोपादानंवस्तुप्रतिवस्तुभावःएकेनैकस्येवधर्मस्याद्विरभिधानेपो

नरुक्त्यप्रसंगात्॥बिंबप्रतिबिंबभावस्तुभिन्नयोरेवधर्मयोर्हिरूपादानं॥यथा॥ भातिरामभुजोभीममंडलाग्रा
ग्र्यमंडितः॥उच्चंडकुंडलिकांतश्रीखंडतरुकांडवत्॥९॥अत्रभीमोच्चंडपदाभ्यांउभयत्रापिएकस्येवधर्मस्य
उपादानात्वस्तुप्रतिवस्तुभावः॥चक्रीकृतधनुर्मध्यलक्षितंराघवाननंपरिवेषांतरालस्थंबभौबिंबमिवेंदवं॥
अत्रचक्रीकृतशरासनपरिवेषयोस्तुल्यतयारघुनंदनाननेंदुबिंबयोःसादृश्यप्रतीतेर्बिंबप्रतिबिंबभा
वेनोपमा॥पुनरस्यापिद्वैविध्यंसंभवति॥समस्तवस्तुविषयाएकदेशवर्तिनीचेति॥आद्यायथा॥लंपारिजा
तद्दरराजसिरामबाहुदंडोचकांडसदृशोततिरंगुलिनां॥तुल्यप्रवालपटलेनमधात्रतस्रोमुक्तालतास्मितमु
दंचतिपुष्पकल्पं॥१२॥द्वितीयायथा॥जोत्स्नालेशैरिवविरचितस्रस्तपाटीरपत्रैस्तारापुंजैरिवविगलितैस्तारहा
रैःपरीता॥संध्यामेघच्छदसहचरैर्लंछितालक्तकांकैरंजेसीतारघुपतिकयोःकेलिशय्यात्रभाते॥१३॥अत्रकेलिशय्यां
वरस्त्रस्तरीवेतिअनुक्तत्वादियमेकदेशवर्तिनी॥एवमन्येपिअवांतरभेदाःसूक्ष्माःप्रेक्षावद्भिःस्वयमेवो
त्प्रेक्षणीयाः॥द्वि
स्तरभयादुपरम्यते॥विदुषांप्रमदायसोपसर्गागरुडांकस्यसुदेगतोपसर्गाः॥अपकारवतीप्रियायशंभो
रुपमेयंप्रतिभात्यचिंत्यरूपा॥इत्युपमानिरूपणं॥अथोपमालक्षणे॥प्रथमविशेषणव्यवच्छेद्यायाःउत्प्रे
क्षायाःस्वरूपंनिरूपयति॥अन्यत्ताध्यवसायोयःप्रकृतस्यगुणादिना॥सोत्प्रेक्षाकथितासास्याद्द्रव्यादिभ्यः
चतुर्विधा॥प्रकृतस्योपमेयस्यगुणादिवशात्अप्रकृतताध्यवसायोयःसोत्प्रेक्षेत्यर्थः॥संभावनमध्यवसा
यस्तर्कोभिमानउहउत्प्रेक्षेतिपर्यायाः॥गुणादीत्यादिशब्देनक्रियाविवक्षिता॥तथाचायमध्यवसायोजाति
गुणक्रियाद्रव्यगोचरत्वेनचतुर्विधोभवति॥अपिचतुर्धाव्यवस्थापयतिएवंचगुणक्रियोरुत्प्रेक्षाहेतुत्वेनउ
त्प्रेक्षागोचरत्वेनचद्वैधाव्यनुप्रवेशःसंभवतितेचप्रत्येकंभावाभावाभिमानेनद्वैविध्येअष्टधाजायंते॥उक्तंहि
लोकातिक्रांताविषयाभावाभावाभिमानतःसंभावनेयमुत्प्रेक्षावाच्येवादिभिरिष्यतेइति॥तेचाध्यवसायस्यगु
णक्रियानिमित्तस्यद्वैराश्येप्रत्येकंद्विधाभूत्वाषोडशसंपद्यंतेनिमित्तस्यचोपादानानुपादानाभ्यांद्वैविध्ये
द्वात्रिंशद्भवतिहेतुःस्वरूपफलोत्प्रेक्षणेः पुनरेतेषामेवप्रत्येकंत्रैविध्येषण्णवतिः॥अमीचवाच्योत्प्रेक्षा
भेदाःतद्वाचकशब्दास्तु॥मन्येशंकेध्रुवंनूनंप्रायइत्येवमादिभिःउत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपितादृ

शाद्गतिपरिगणिता: एतच्छब्दाप्रयोगेतुगम्या:॥ ननूध्यवसायमूलत्वाविशेषादुत्प्रेक्षातिशयोक्त्यो: कथंभेद: इत्थं
विषयविषयिणोरन्यतरनिगरणेनअभिन्नत्वेनप्रतिभानमध्यवसाय: साहृद्विध: साध्य:सिद्धश्चेतिमत्रप्रकृ
तस्यअप्रकृतधर्मसंबंधात्तदध्यवसाय: साधनंसाध्य: सयत्रतत्रोत्प्रेक्षा॥ तदुक्तंअत्रकृतत्वेनाध्यवसायोथगु
णाभिसंबंधात्॥साध्य: प्रकृतस्यथदाकथितोत्प्रेक्षातदाज्ञेया॥यत्रपुन: गुणसंबंधानास्थयाप्रौढोक्तिमात्राद्वि
षयिणोविषयगतत्वेनारोपणेभिन्नस्यापिविषयनिगरणेनप्रकृतत्वादभेदप्रतीतेध्यवसाय:सिद्ध:॥यत्र
तत्रातिशयोक्तिरितिविवेक:॥ अत्रचमत्कारातिशयशालिन: कियंतोभेदाउदाहृता:॥ तत्रउपात्तगुणनिमित्त
जातिभावस्वरूपोत्प्रेक्षायथात्वंनासीरवसुंधराधरमिथ:श्लिष्यद्भुजामंडलीकेयूरश्लथपल्लवाग्रजरज: पुं
ज: प्रवालारुण:॥ रामक्षौणिपतेप्रतापतपनाद्युध्येतवोदेष्यत: पूर्वोदंचदनूरुदेहसुषमासंदोहवद्द्योतते॥
अत्रसुषमाशब्दोजातिवचन:आरुण्यगुणोनिमित्तंप्रतापतपनप्राचीनानूरुदेहादिसेरलोकसिद्धत्वात्
नोपमाशंकाअत्रप्रवालारुणइतिगुणवाचकपदस्थानेस्फुरन्नंबरइतिक्रियावाचिपदप्रक्षेपोलिदमेव
उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षायाउदाहरणंद्रष्टव्यं॥ समग्राकृतिरितिपदोपादानेतुअनुपात्त
गुणक्रियानिमित्तजातिस्वरूपोत्प्रेक्षोदाहरणंद्रष्टव्यं॥अत्रोत्प्रेक्षात्रयेपिसुषमोत्प्रातिपदिकार्थमात्रतया
हेतुफलभावोक्तेरवाभावात्स्वरूपोत्प्रेक्षात्वं॥अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षायथा॥ भवत्कीर्तिप्रतापा
भ्यांरघुराजन्यपुंगव॥सुवनानिविभाव्यंतेप्रसिक्षार्केदुशून्यवत्॥१४॥अत्रअर्केदुशून्यवद्दितिजात्यभावस्व
त्प्रेक्षित: जातिहेतूत्प्रेक्षायथानिर्मलयानिर्गलयाशीतलेयारामभद्रतवकीर्त्या॥ परित: स्फरसरितेवत्रय
मत्रैरपवित्रितंजगतां॥१५॥अत्रगंगायेतिजातिहेतुत्वंजातिफलोत्प्रेक्षायथाकरालकरवालस्लेसत्यरामा
रणांगणे॥जहोचर्ममयंकोशंरत्नकोशायवैरिणां॥१६॥कोशत्वंजाति:गुणस्वरूपोत्प्रेक्षायथायेचिंतयंति
रघुनंदनपादपद्मंतेषांमनस्स्फटिकस्थिरस्थिरएवराग:॥ तत्रावतीर्णइतिनूनमवैमिनोचेदेवंकृतेष्व
नुगतोगलितोहिराग:॥१७॥अत्ररागगुणस्वरूपत्वमुत्प्रेक्षितं॥गुणहेतूत्प्रेक्षायथाआलिंगनाद्रघुपते २३
रवनीस्कतायाहारेषुभूरिकुचमंडलमाश्रितेषु॥उत्स्रस्तातामुपगतेषुभयेनमूनंक्षीणंबलग्नममुच

स्तएवनीवी॥अत्रनीवीगलनेभयगुणस्यहेतुत्वं॥गुणफलोत्प्रेक्षायथानिर्भिन्नासृक्कुंभिकुंभविगलत्संरक्त
मुक्तावलीगंगासंगिभवत्कृपाणयमुनाधाराजलस्रोतसि:॥ सत्संगरकंठसीमनिजहृद्देहान्प्रतीपान्नृपा
नि: शेषस्टहणीभवेद्रतिरमासंभोगसौख्येछया॥१९॥गंगायमुनासंगमेशरीरत्यागस्यसि.तासितेसरिताद्वि
स्यस्यामविप्रसिध्यंमुक्तिहेतुत्वंअत्रसौख्यगुणस्यफलत्वं॥क्रियास्वरूपोत्प्रेक्षायथा॥२०॥रवद्वैन्यस्तात्वयारा
मलंकातासमरांगणे॥रिपुक्षोणीभृदेणीहृकृष्टशंतरलताक्रवंक्रियाहेतूत्प्रेक्षायथा॥पुन:पुन:कृतारातित
रलप्राणपारणे:॥नूनंरामस्यतरलोमंडलाग्रमहोरग:॥२१॥अत्रतारल्यंक्रियास्वरूपंक्रियाहेतूत्प्रेक्षाय
थावाकुरुमउहतुकरणंयुतासतिहरिणीहिलपसता॥ मारस्फहारससवजाखुजग्ग।जीवंत:सणसाहृ
रतितो॥२२॥अत्रशक्तिपदसाध्यवसानलक्षणयालक्ष्यांप्रहतंतस्या:स्फुधासहजननक्रियाया: हेतुत्व
क्रियाफलोत्प्रेक्षायथामरुतेबालभागवतेमहाकाव्योनिवेशनीरंध्रानिकुंजमध्यंमानमीसमीरा:सहसा
संभ्रमा:॥नशाकुवंतीहपुनर्विनिर्गमेलतांगनालिंगनलालसाध्रुवं॥२३॥अत्रआलिंगनक्रियाया:फलत्वं
द्रव्योत्प्रेक्षायेपातालकोटरकुटीरतलेविलीयस्मामन्वहंबतवहन्नपिभोगभोगे॥केनाप्यनाकलितपूर्व हु
यद्विषाद:। शेषोरघूद्वहभुजाकृतिमापन्नूनं॥२४॥इहरघुपतिभुजस्यशेषत्वेनाध्यवसायाद्द्रव्योत्प्रेक्षाद्रव्य
हेतूत्प्रेक्षायथाभस्येतार्क्ष्यादिवाहीनाभीता:सातापतेश्शरात्॥नगराणिविसुंचंतिनाकुलीनाविरोधिन:॥२५॥
श्नाकुपक्षेअकुलीना:नभवंतीतिनाकुलीना:सकुलप्रसूताइत्यर्थ:सर्पपक्षेनाकुषुवल्मीकेषुलीना:श्लेषोत्था
पितेयंहेतूत्प्रेक्षा॥द्रव्यफलोत्प्रेक्षायथा॥येश्रण्वंतिनराघवस्यचरितंबिंबंतदीयंचयेनोपश्यंतिनसंस्थशां
तितुलसींजिघ्रंतिनांघ्रिस्तितां॥नोपादांबुपिबंतिनक्षणमपिध्यायंतिवातत्तनुंसंज्ञायेजननीजनस्यजठरा
ज्जाताजनास्तेध्रुवं॥२६॥पादत्रयेषडिंद्रियाणांवैफल्यमुक्तंअत्रसंज्ञायेतिद्रव्यस्यफलत्वमुक्तंअत्रोत्प्रेक्षा
त्रयेपिशेषतार्क्ष्यसंज्ञाशब्दानांद्रव्यवाचकत्वात्द्रव्योत्प्रेक्षात्वमवगंतव्यं॥एवमन्येपिभेदाऊह्या:विस्तरभया
द्विरम्यते॥पूर्वंसूत्प्रेक्षामा: यत्साकर्षमाशंकयानिराकारिसातिशयोक्ति:तयोर्व्यक्तताबोधदार्ढ्यायाधुनात्रि
रूप्येत्यभिप्रायेणतांनिरूपयतिअभेदेभेदकथनंभेदेसत्यभिदाभिधा॥अथयोगेयोगकथनंयोगेचायोगवर्णनं॥

कार्यकारणयोः कालस्थेक्यंतद्व्यत्ययोपिच॥ षड्विधातिशयोक्तिर्हिसंमताचारुचेतसां॥ कविप्रौढोक्तितोसांपण्णांसा ता
मान्यलक्षणं॥अत्यक्तिरतिशयोक्तिरितिकेचिदाहुराचिरेकेचित्ध्यवसायमूलातिशयोक्तिरितिलक्षयंति खाभ
भिन्नप्रतीतिरूपाध्यवसायाभावापराधात्कार्यकारणपौर्वापर्यविपर्ययतत्समकालतारूपंभेदद्युगंनिन्हुवते॥
अभिनवगुप्तास्तुतयोरतिशयोक्त्यंतर्भावकटाक्षेणेवकविप्रौढोक्तिजीवनामातिशयोक्तिमभिदधुः।अतोवाचीनानां
निरर्गलगलगर्जनंप्राचीनप्रबंधुभावापरिज्ञाननिबंधनमित्यलंप्रपंचेन। भेदेःभेदोक्तिर्यथा॥जडध्वस्तन्नेत्रं स
नहिनचपलांशप्रकृतिकोनतेसंतिलिङ्गाण्यपिनभवतोवक्रिमगुणः॥नवानिस्नेयोगोभवतिमधुपेर्नापिवि
टपैर्नवातेकंप्रत्यंतदपिरघुपत्संस्करतरुः॥२७॥अत्रमंदाररघुनंदनयोर्भेदेःभेदरूपातिशयोक्तिः।नन्वत्र
व्यतिरेकोपिप्रतीयतइतिचेत्तत्कामंप्रतीयतांनतावतातिशयोक्तेःकाचिद्क्षतिः।अभेदेभेदोक्तिर्यथा। महो
त्साहालीलालवलुलितकैलासगिरयोभुजाबाणाः प्राणापहरणधुरीणाश्चसुभटाः। गताःपूर्वंसर्वंममपु
नरपूर्वैरुचमिमेभवत्सामेभामेरणशिरसिकामेजयकथा॥२८॥ इहापूर्वइत्यसमस्तंपदद्वयमिदंरावणव
चनं॥अत्रभुजादीनामभेदेपिभेदःकल्पितः॥असंबंधेसंबंधोक्तिर्यथा॥ रामस्योच्चंडबाणादविक्षतलगलि
तैःकांडप्रकांडैर्दनुजैःखंडितांगैर्विदलितमसकृन्मूर्छितंचंडरश्मिं॥शुंडालेंद्राःप्रचंडाःपरिसरगगनप्रां
गणेहिंडमानाःशुंडादंडाग्रमुक्तैर्वमथुकणगणैस्तूर्णमुद्बोधयंतिं॥२९॥इहसूर्यस्यमूर्छासंबंधेपित
संबंधःगजानांचतद्बोधकत्वधर्मासंबंधेपितसंबंधश्चोक्तःसंबंधेसंबंधोयथा। यदाभवदपांनिधिर्भवत्पांग
रागान्निनाहतोरघुपतेतदाकपिनिबंधसेतुस्थयः॥तदादिपत्यसांनिधिंपरिविमुच्यसोपद्रवंविकुंठभवनेस्थि
तिंवितनुतेस्थलक्ष्मीपतिः॥३०॥अत्रस्थलक्ष्मीपतेःसिंधुबंधसंबंधेसत्येवासंबंधउक्तः॥ कार्यकारणयोरेककाल
तायथा॥ तवदाशरथेः शरधेर्गलितास्तुनिनालयादविशिरवाः॥अतिविभवपुषोवपुषोनिरगुश्चतदेव
रावणप्राणाः॥ कार्यकारणपौर्वापर्यविपर्ययोयथा प्रयाणपटहारवातवपुरारिशातोदरिरघुप्रवरगोचरीचरीः
करातिभूभृतोरीः॥ बुधेषुमदसिंधुरप्रकरबंधुराःसंपदःपदंविदधतेथतेनृपदृशः रूपासंस्पृशः॥३१॥संप्रत्य २४
पमालक्षणेभिन्नेतिविशेषणव्यावर्त्यमनन्वयालंकारंलक्षयति॥ ऐक्येह्यनन्वयः प्रोक्त उपमानोपमेययोः॥यत्र

DR. BHAU DAJI MEMORIAL

सदृशावस्त्वंतरनिषेधद्योतनायएकस्यैवोपमानोपमेयभावःप्रतिपाद्यते॥ तत्राननन्वयालंकारः॥ द्वयोःखलूपमानो
पमेययोरेक्यंयत्रतेनानन्वयः॥ सनास्तीत्यनन्वयत्वमन्वर्थं॥ यथा॥उन्मूलनेवदुष्टानांशिष्टानांपरिपालने॥रामोराम इ
वस्रोणीमंडलारंडइलोबभौ॥३२॥अथास्यविषयविषयिणोरभेदप्रतीतिमात्रेणरूपकादिसांकर्यमाशंक्यतेत्यभि
प्रायेणोपमालक्षणेवाच्यपदव्यावर्त्यतयारूपकंलक्षयति॥विषयानिन्हवेनान्यस्यारोपेरूपकंमतं॥अन्यस्या
प्रकृतस्यप्रकृतेविषयमनपन्हुत्यैवयदारोपणंतद्रूपकं।रूप्यतेतिविषयी।तदन्यमात्मनारूपवंतंकरोतीतिरूपक
शब्दप्रवृत्तिः।अत्रचाभेदस्यप्राधान्यमात्रं।वस्तुतस्त्वेवभेदः॥ तेनाननन्वयव्यावृत्तिः॥अतएवोपम्यगम्यतावचोयु
क्तिश्च।अत्रविषयानिन्हवेनारोपइत्यनेनातिरोहितस्यविषयस्यारोपेणोपरक्तत्वंविवक्षितं।तथाच।विषयातिरो
धानंशेषसंदेहभांत्यपन्हवानांव्यावृत्तिः॥तेषांविषयस्यसंदेहभांत्यपन्हवेसतिरोहितत्वात्आरोपइत्यनेनउक्ते
सादेरुपमादेर्नाव्यावृत्तिः।उत्प्रेक्षादेरारोपव्यतिरिक्ताध्यवसायमूलत्वात्तस्यालंकारस्यआरोपप्राणत्वात्उपर
क्तमित्यनेनपरिणामालंकारस्यव्यवच्छेदः।अत्रआरोप्यमाणस्यप्रकृतोपयोगितयाविषयपरिणामरूपत्वेनप्र
कृतोपरंजकत्वाभावात्।अतःसर्वेभ्यःसादृश्यमूलालंकारेभ्योविविक्तएवास्यालंकारस्यविषयः।तत्रावाच्यविधं
सावयवंनिरवयवंपरंपरितंचेतिअवयवावयविसाकल्यवृत्तिसावयवं।अवयवतोनिष्क्रांतमवयविमात्रपर्य
वसितंनिरवयवं।परंपरास्यसंजातेतिपरंपरितं॥सावयवंद्विविधंसमस्तवस्तुविषयमेकदेशवृत्तिचेति।निरव
यवंचद्विविधंकेवलमालारूपंचेतिपरंपरितंचाद्विविधं।।श्लिष्टशब्दनिबंधनमश्लिष्टशब्दनिबंधनंचेतिद्वि
धस्यापिकेवलमालारूपेणप्रत्येकंद्वैविध्येरूपकमष्टविधंतस्यसमस्तव्यस्तभेदेनद्वैविध्येषोडशविधत्वंय
त्रयदाआरोप्यमाणंअनेकमवयवावयविभावनास्खलितंशुद्धमेवोपस्थाप्यतेतदासमस्तवस्तुविषयंसावय
वंयदातुकिंचिदुत्प्रेक्याकिंचिदर्थाद्द्योतनीयतेतदातदेकदेशवर्ति।।छिन्नेंद्वारिशिरोरसाद्रुधिरकेस्तत्कंधरोच्चै
रस्रग्धारातेलरसैस्तवासिरगदंकारःसम्प्लवोबभौ॥किंब्रूमोरघुरामवीरशुचिनादक्षेणायेनाद्भुतंदुर्वारः श
मितोमहान्बहुमुखस्त्रैलोक्यतापज्वरः॥ बहुमुखोरावणः बहुप्रकारश्चअत्रखड्गस्यवेद्यत्वंनिरूप्यतदुचि
तावयवनिरूपणात्समस्तवस्तुविषयता॥द्वितीयंयथा॥ शुंभन्मुंडकुंडालशैलाविरलपरिगलद्दानधा

राक्षसराणिभाभ्यल्कूजद्दृष्टांगान्मस्करहरियुतान्युग्रखड्गाहतानि॥आकर्णाकृष्टचाप च्युतनिबिडतरोद्दंडकांडप्र
कांडज्वालामालाकरालोद्दहतिरघुपतिर्वैरिसेनावनानि॥३४॥अत्रअवयवरूपणादेवरामस्याग्नित्वेनावयव
विरूपणंगम्यतइत्येकदेशादहतित्वंकेवलंनिरवयवंवयथासुखंदंडरामचंद्रस्यवेध्यायांतेनिरंतरंअपारघोरसंसा
रपाराद्वारंतरंतितेते॥३५॥अत्रमुखस्यइंदुत्वंसंसारस्यसागरत्वंनिरूप्यते॥ननुतदवयवादिकंकिंचिन्निवेश्यते
मालयाथवा॥आम्रोडितंस्करतरोःप्रतिबिंबमिंदोर्भेदःस्फुपर्वसुरभेर्वृतिर्निधानां॥द्वित्वंरवेःपरिणतिःप्रस
वायुधस्यमूर्त्यंतरंमुरारिपोर्जयतीहरामः॥३६॥इदंनिरवयवंमालारूपकंएकस्येवानेकभारूपणात्रूपक
हेतुकंपरंपरितंतन्नश्लिष्टशब्दनिबंधनंकेवलंपरंपरितंयथाचरंतमंबरेदृष्ट्वारामेणप्रेरितंखगंअहीनांवैरि
णोभूषामुंचतिनगराण्यहो॥३७॥अत्रबाणस्यतार्क्ष्यत्वेनानिरूपणंशत्रूणांसर्पत्वेननिरूपणंचहेतुहेतुमद्भा
वापन्नातिपरंपरितंउभयत्रापिश्लेषोल्लसनात्श्लिष्टशब्दनिबंधनत्वंएकवारमेवनिरूपणत्वात्केवलत्वंच
इदमेवमालयायथा॥कदंबाडंबरग्रीष्मत्वारापतिदिवाकरःक्ष्मभृद्धरजंभारिर्भासतेभरताग्रजः॥३८॥
अत्ररामस्यग्रीष्मत्वादिनिरूपणंआश्लिष्टशब्दनिबंधनंकेवलंपरंपरितंयथाश्रीरामचंद्रवदनराकाता
रकनायकःविद्वन्नेत्रचकोराणांवितनोतिकुतूहलं॥४०॥अत्रराममुखस्यचंद्रत्वंनिरूपणंविद्वन्नेत्राणांच
कोरत्वरूपणंहेतुरितिपरंपरितत्वंश्लेषाभावादश्लिष्टनिबंधनत्वंसकृदेवरूपणात्केवलत्वंचमालारूपाश्लिष्ट
शब्दनिबंधनपरंपरितंसाधर्म्येणनसंभवतिवैधर्म्येणयथा॥वाल्मीकेर्व्यासबुद्धानांविबुधगणविपद्रोगिनां
वेनतेयाःपापाग्नीनांपयोदाःप्रतिभयकरिणांप्रक्रमाःपांकलानांकुल्याःलक्ष्मीलतानांकविकुमुदरुचांकंद
लाःकोमुदीनांकल्याःकल्पात्मकानांपटुतरतमसांकेलयोरामकीर्तेःअत्रपूर्वार्धेवैधर्म्येणउत्तरार्धेसाधर्म्ये
णप्ररूपितमितिदृष्टव्यंएवमष्टविधमपिरूपकंनिरूपितंअन्येष्टेभेदाःस्वयंकूह्यावान्नेहनिरूपिताः
अथैतल्लक्षणेव्याचर्त्यानांपरिणामादीनांक्रमाल्लक्षणान्याहआरोप्यमूर्त्याविषयःपरिणामंभजेद्यदि॥प्रकृता
र्थोपयोगायपरिणामःसतुद्विधाऽयंत्राविषयःप्रस्तुतकार्योपयोगायारोप्यात्मनाविषयस्यपरिणतिःतत्रपरिणामइतिना
पिसमासेकेऽत्रआरोप्यमाणस्यप्रकृतोपयोगित्वेपिवाच्यताभावात्अयंसामानाधिकरण्येवैय्याधिकरण्याभ्यांद्वि
धाभवतियथाबोधायविबुधलक्ष्म्यानष्टापादत्रासुरवाहिदृष्टायाः॥भवतोगारुडमंत्राःविजयंतेरामचापटंकाराः
॥४१॥अत्रधनुर्गुणधनीनांस्करलक्ष्मीमूर्छाप्रकृतोपयोगायारोप्यमाणगारुडमंत्ररूपेणपरिणतिःभवतोगारु
डमंत्राःचापटंकारेइतिपाठेइदमेववैय्याधिकरण्योदाहरणंवानिषिध्यप्रकृतंयत्राप्रकृतारोपणंभवेत्तत्रपरि
णामालंकारःसत्रिधापरिकीर्तितःआरोप्यप्रकृतानिषेधःनिषिध्यारोपःछलशब्दप्रयोगाद्येतिक्रमेणयथाक्र
मंसोमसमासतारघुपतेःकीर्त्यंगनायाःमहाशय्यानांवरमंत्रजातिकलिकाःक्षिप्ताःनतारागणाः॥४१॥पेटीरा
जातिराजतीहिमरजःपूर्णानराकाशशीतन्मध्येमृगनाभिकुंकुमवटकास्तोमोनचायंमृगः॥नेदंमंडलमेंदवंरघु
पतेःकीर्त्यंगनापारपादवैरिंचपदंसमुज्जिगमिषोःसोपानहीरोपलःनांकोऽयंतवदानवारिलहरीसंसिक्तसर्वंसह
हासंवारांचितपंकजेक्षचरणन्यासेनतत्रस्फुटः॥४२॥कालिंदीतांसेवतेरवटरूपानोचेद्देवरामतत्संगमेनंस्व
र्वाहिन्याजीवनानांकथंस्यात्तदधिःसूर्यानंददेहेतुश्चनस्यात्॥४४॥कविसंमतसादृश्यादित्यनेनस्थाणुर्वापु
रुषोवेत्यादिसंदेहव्यावृत्तिःतत्रहिंसाधारणधर्मावबोधसभ्रांतेनाविवेचकधर्माग्रहेणसंदेहस्वरसवाहि
ज्ञानादिहेतुनानवबोधनिमित्तःसंदेहःकिंतुकविःस्वप्रतिभातिशयेनवर्णयितुंसादृश्यदर्शनेनसंदेहमुपनि
बध्नातिसात्रिधाश्रुधानिश्चयगर्भानिश्चयांताद्येतिक्रमाद्यथासचेतनाकांचनपुत्रिकावाशरीरिणीमन्मथ
चातुरीवासौदामिनीस्थैर्यवतीकिंमेघाकावानजानेरघुवीरपार्श्वे॥४५॥अत्रसंदेहमात्रस्यपर्यवसानाल्लुप्तत्वं
असावंभोधिःकिंसवितरणिभावंनभजतेमहादेवोयंकिंसवहतिशिवामिश्रितनुं॥विधाताकिंवायंसाहि
कलितवान्नाभिजननंविचिंत्येथंरामंदधतिकवयःसंशयधियं॥४६॥अत्रसाधारणधर्मातिरिक्तविशेषधर्मो
ल्लेखवान्निर्णयश्चैवगर्भितं॥भानुःकिंसनभोगमार्गचतुरःकिंपावकोयंजनाःसर्वत्राप्यनलंतमाहुरधिकंछत्रोजडे
नाप्यसौ॥किंचंद्रःसनवोदयेर्नवसुधासंमोदमंकूरयत्येवंराममवेक्ष्यनिर्मलगुणैःपश्चाद्विनिश्चिन्वते॥
॥४७॥अत्रविशेषधर्मोल्लेखमात्रव्यतिरेकेणांतेगुणैर्निश्चिन्वतइतिनिश्चयोररीकारादर्थनिश्चयांतःसंदेहा

लंकाराः सचनभोगेत्यादिश्लेषपदोपात्तानांतत्तदर्थानांभेदेसत्यभेदाध्यवसायरूपातिशयोक्त्यनुप्राणितरूपकं गं
गाभावेनसंकरः सूर्यादिव्यतिरेकः स्फुटएवकिंचनिरतिशयतेजस्विताशालितयासूर्यादिरूपतायामेकदेशमं
गिरूपैकदेशांतरनिषेधस्यक्रियमाणस्यश्रीरामचंद्रविषयेनिर्वचनातिशयितारूपविशेषोपसेपकत्वादासेपा
लंकारप्रभेदः अपिचप्रसिद्धेषुरविराशिरूपानुषेकस्यापिरघुपतितुल्यतानाभूत्किमुतान्येषुतेजस्विषिति
केसुत्यव्यपदेशेनदंडापूपिकास्फूर्तेरर्थापत्त्यलंकारस्यगम्यमानत्वान्नसंसृष्टिरित्यलंप्रपंचेनकविसंमतसादृश्यादू
षयोपहीतात्मनि॥आरोप्यगोचरधीश्चेत्स्यात्भ्रांतिः मदलंकृतिः अतस्मिन्तत्बुद्धेर्भ्रांतिः तद्बुद्धानुभ्रांतिमान्यथा
द्युतकनकरुचारामप्रतापतपनेनरूपिताकृतिषु॥स्वर्णगभ्रांतिरभूद्वर्णीरणांसमस्तश्लेषेषु अत्रकविसं
मतसादृश्यादित्यनेनचारुचक्यादितौल्येनजायमानरजताद्भ्रांतिव्यावृत्तिः आरोपविषयस्यात्रभ्रांतिगम्यत्व
देवालोपमूलसर्वालंकारःवैलक्षण्यंविरोधाभावाच्चनसंदेहांतर्भावः कविसंमतसादृश्यमूलत्वेप्यस्यतत्तुल्ये
त्वाभावान्नस्मरणांतर्भावःस्मरणालंकारस्तुसदृशार्थानुभूत्याअन्यस्मरणेस्मरणमतंतेनअदृष्टादिजनित
स्मरणव्यवच्छेदः यथाद्युतकनकोज्ज्वलेन [illegible] कलकांत्यारामभुजंगीस्यसीतयाश्लिष्टं॥ चंपकलता
आकलितंस्मरंतिमुनयस्तमालतरुकांडं॥ननुभवतुभ्रांतिमतोपन्हवादिभ्योभेदःउल्लेखालंकारभेददृतिचेदुच्य
तेऽउल्लेखोबहुधेकस्यबहुभिः स्यान्निरूपणंएकंवार्थंअनेकैर्ग्रहीतृभिरनेकधोल्लिख्यतइत्यतत्सोयमुल्लेखालंकारः॥यथाधर्मः शरीरभरदसावितिधर्मनिष्ठामूर्तेनयोयमितिमंत्रकृताधुरीणाः॥कालोहितीयइतिकूट
कठोरकृत्याः केवल्यमित्यपरताः कलयंतिरामं॥उपरताः सुमुक्षवः अत्रानेकधोल्लिख्यतइत्यनेनभ्रांतिमद्भा
वृत्तिः भ्रांतिमत्यनेकधोल्लेखाभावात्तूअनेकैर्ग्रहीतृभिरित्यनेनअतिशयोक्त्यपोहः तत्रअनेकग्रहीतृकत्वानि
बंधाभावात्तनचप्रकृतेअप्रकृतारोपरूपकेतर्भावः शंक्यः तस्यप्रकृतोपरंजकत्वमात्रेणोत्थानात्वस्तुनस्ता
दृप्येपुनरस्यप्रवृत्तिः एवंतावदुपमालक्षणेलोकसिध्येनभिन्नेनेतिचविशेषणद्वयव्यावृत्तोल्लेक्षाद्यलंकार
निरूपणमुखेनव्याख्यातंअधुनातदेकवाक्यवाच्यंस्यादितिविशेषणंव्याख्यातुंतद्व्यावर्त्योपमेयोपमांल
क्षयतिद्वयोःक्रमात्भवेतांचेदुपमानोपमेयते॥वाक्यद्वयेनोपमेयोपमासाकथिताद्विधा॥तत्रवाक्यद्वयावि

शेषणेनोपमाव्यवछेदः अत्रोपमानोपमेययोःमिथःपर्यायेणतादृक्ताकल्पनमुभयातिरिक्तसदृशावस्त्वभावध
नना[illegible]इत्यद्वैधाप्रवर्ततेधर्मस्यवस्तुप्रतिवस्तुतयानिर्देशोसाधारण्येनचेतिक्रमात्तथा॥कुलिशकरवालभीषणबा
हुः करवालकुलिशभीमकरः॥इंद्रइवरामचंद्रोराजतींद्रोपिरामचंद्रइव॥इहरामस्योपमेयत्वेकरवालः कुलिश
मिवेत्युपमितसमासाश्रयणेनबाहुविशेषणतारामकरेकुलिशासंभवात्इंद्राविशेषणत्वेतुकुलिशंकरवालमि
वेत्युपमितसमासः॥इंद्रस्योपमेयत्वेत्तरविशेषणमेवद्रष्टव्यंततश्चात्रभिन्नयोरपिधर्मयोरक्तिमाहिम्नाएक
तयाध्यवसितयोर्वारद्वयोपादानेनवस्तुप्रतिवस्तुभावोनाविरुध्यतेवारद्वयोपादानंचात्रसमासद्वयेनस्वीकारात्।
श्रीरामचंद्रभवतःकरुणावरुणालया॥प्रतापःसूर्यवत्तिग्मःसूर्योभातिप्रतापवत्॥अत्रातिग्मत्वं॥साधारणोधर्मइ
तिसाधारण्येनदृश्यमुपमेयोपमा॥उपमानोपमेयत्वप्रतिपादकवाक्यद्वयुल्लेखेवस्तुप्रतिवस्तुभावेनधर्मनिर्देशमात्रस
ख्येनअस्यप्रतिवस्तूपमादसंकीर्यमाशक्येतेतितान्॥लक्षयति॥यत्रवाक्यद्वयेवस्तुप्रतिवस्तुतयाभवेत्॥समा
नधर्मनिर्देशः प्रतिवस्तूपमासता॥यत्रउपमानोपमेयप्रतिपादकवाक्यद्वयेसामान्यधर्मःकथितः पदस्यपुनस
स्तुरोधग्रस्तत्वात्शब्दांतरेणोपादीयमानेनेःकृताप्रकृतयोरोपम्यंगमयतिसाप्रतिवस्तूपमाद्वयंसाधर्म्यवैध
र्म्याभ्यांप्रवर्ततेयथा॥जामदग्निप्रतापाग्निग्रसनेराघवःप्रभुः॥कालकूटानलज्वालागिलनेधूर्जटिः पटुः॥अ
त्रोपमानोपमेयवाक्यद्वयवर्तिग्रसनगिलनपदाभ्यांप्रभुपटुपदाभ्यांचेअभिन्नावेवसंहरणसामर्थ्यरूपोध
र्मोस्वक्रियमाणोप्रकृताप्रकृतयोरामहरयोरोपम्यंगमयतःउपमेयोपमायांतुऔपम्यस्यबाधत्वंधर्मयोश्चस्वतो
भिन्नयोरेवअतिशयोक्तिवशाद्भेदः इहतुतदुभयंवेपरिस्फुटमित्यनयोर्महान्भेदः॥अस्यवस्तुप्रतिवस्तुभावोपजी
वितयाबिंबप्रतिबिंबभावोपजीविनोदृष्टांतालंकारात्भेदःस्फुटएव॥यथा॥रामस्यकेवलमकुंठदशास्यकंठ
वाटीविपाटनविधौपटवोवैपाटाः॥जेतुंहिरण्यकशिपूग्रभुजांतरालंकोन्योन्यसिंहनरवरात्विभुजांतरालं॥अत्रापि
वैधर्म्येणरघुसिंहनरसिंहयोरुपमेयत्वंगम्यते॥बिंबानुबिंबभावात्चेदुपमानोपमेययोः॥साधर्म्यंचदृष्टांतादिदृ
स्तदृष्टांतोद्विधामतः॥अत्रदृष्टयकूसाधर्म्यमित्यनेनोपमेयोपमाप्रतिवस्तूपमाभ्यांभेदः॥भिन्नयोरेवधर्मयोर्वा
क्यद्वयेवारद्वयोपादानात्प्रकृताप्रकृतयोरोपम्यावगतौदृष्टांतालंकारः दृष्टांतोनिश्चयोत्रेतिदृष्टांतोन्वर्थः॥

सोपिपूर्ववद्विविधः॥रघुनाथएववज्रांकोयुगपद्दारिर्द्यदारणेवि दुषां॥ रविरेकएवदक्षः सकृदखिलध्वांतसंततिध्वंसे॥
अत्ररघुनाथदिननाथयोः बिंबप्रतिबिंबभावेनोपम्यंगम्यते॥ दारिद्र्यदारणतमोध्वंसनयोर्भिन्नधर्मत्वाच्चबिंब
प्रतिबिंबभावः॥रेरास्सखः पलायध्वंसमायातिराघवः॥ तावद्दुद्योतिखद्योताः यावन्नघुमणिद्युतिः॥अत्रयथा
रवेरुदयात्खद्योतापगमः तथारामोपगमादस्करनिरास इतिउपमाधर्म्येणगम्यतएवंगम्योपम्यानांतुल्ययो
गितादीनांभेदो बोधव्यइतितल्लक्षणादीन्याह॥ प्रकृतानामुतान्येषांतुल्यधर्मानुबंधतः॥औपम्यंयादिगम्येतसाम
तातुल्ययोगिता॥ यत्रप्रकृतानांवाप्रकृतानांवातुल्यधर्मसंबंधादौपम्यंगम्यते॥ सातुल्ययोगिता॥इहप्रकृताप्र
कृतानांव्यस्तानामेवत्रयोजकतास्वीकारेणप्रकृताप्रकृतसमुदायत्रयोज्योदीपकाद्वैलक्षण्यंदर्शितं॥धर्मस्य च
क्रियागुणरूपतयाद्वैविध्येचातुर्विध्यमस्यालंकारस्य केचिदूचुः॥ अपरेतुद्रव्यगुणकर्मणांतद्भावानांचषण्णां
धर्मत्वमंगीकृत्यप्रकृताप्रकृतगतत्वेनद्वादशविधत्वेसत्यस्यद्वादशविधत्वंकल्पयंति॥ यथा॥ पिंडीरपांडुरा
रामकीर्तयश्चगुणाश्चते॥ अंतर्निगूढब्रह्मांडासंचरंतिनिरर्गलाः॥अत्रप्रकृतानांरामगुणकीर्तीनांद्रव्यगु
णकर्मरूपैः॥ तद्भावरूपैश्चधर्मैःसाभिरन्योपम्यंगम्यतेपांडुरत्वंगुणः ब्रह्मांडानिद्रव्याणिसंचरणंक्रियानिर
र्गलाइतिप्रतिबंधकाभावाः प्रतिबंधकत्वंचद्रव्यादित्रयस्यापिसंभवतीतितदभावाअपित्रयइतिषण्णामुदाह
रणं॥ यांभिर्येणरघूद्वहेनविजिताः सप्तापिपाथोधयः प्रावोनिः सृतजीवनाद्दविवृधोर्वाग्निचिंतानलाः॥त्यक्ताः शै
त्यगुणेनपांडुरसुरवाडिंडीरपिंडछलात्कंपंतेसततंमनागपिधृतिंनाद्यापिविंदंत्यहो॥अत्रोपमानत्वेनाप्रकृता
नांसप्तांबुधीनांद्रव्यादिषड्धर्मैः परस्परमोपम्यंगम्यतेतत्रनिःसृतजीवनाइतिअनेनद्रव्याभावरूपोधर्मःकथि
तः ह्रदविवृद्धेत्यादिनाद्रव्यरूपःत्यक्ताःशैत्यगुणेनेतिगुणाभावरूपः पांडुरसुराइतिगुणरूपःकंपंतेइतिक्रिया
रूपः ध्यातंनाविंदंतीतिक्रियाभावरूपइतिषण्णामुदाहरणं॥ प्रकृतानांनां चैतरेषांमोपम्यंगम्यतेयदि॥ समानध
र्मसंबंधःदीपकंतनुषड्विधं॥ प्रकृताप्रकृतसमुदायसंबंधिसमानधर्मोयत्रोपम्यंदीप्यतेतत्रदीपकंतच्च
समानधर्मस्यादिमध्यांतगतत्वेनत्रैविध्येगुणक्रियारूपतेनद्वैविध्येचषड्विधंकेचिदूचुः॥ ताद्वैचारुचारुचेत
सांनांतरंगमालिंगतिधर्मस्यादिमध्यांतगतत्वभेदेनकाव्यचारुतायांविशेषादर्शनात्॥अन्यथाप्रथमाद्वितीया

दिपादगतत्वप्रकारैः भेदांतराण्यपिकिमितिनाजीगणन्नतस्मान्नात्रामिकंत्रैविध्यमादरणीयंनाप्युत्तरंद्वैविध्यंद्रव्या
दिभेदेनधर्मस्यषड्विध्योक्तेः तस्मात्प्रकृताप्रकृतसमुदायसंबंधिसमानधर्मस्यद्रव्यादिरूपेणषड्विधत्वात्तत
दालंबनस्यदीपकस्यापिषड्विध्यंवक्तुंयुक्तं॥यथा॥ विकटनटन्महानटेशजटाटविकातटिनीजलभरसंगरंगदुर्भं
गितरंगगणाः तववचसिरोरघूद्वहस्फुधारसंसारधराजगतिमिरर्गलाः परिचरंतिपटीरहिमाः॥अत्रवर्ण्यत्वेनप्रकृ
तानांरामचंद्रवचनानामुपमानत्वेनाप्रकृतानांगंगातरंगाणांचद्रव्यादिरूपषड्विधसमानरूपसंबंधादौपम्यं
गम्यतेतत्रस्फुधारसोद्रव्यंशीतलत्वगुणः चरणंक्रियानिरर्गलत्वंपूर्ववद्भावत्रयमितिषण्णामुदाहरणंअन्येत्वा
हुः यः प्रस्फुताप्रस्फुतयोर्वस्तुनोरेकत्रापिसंगतः॥ समानोधर्मएकोन्यदीपयेत्सतुदीपकमितिव्याख्यातंभेदंपूर्वैः
प्रकृतपदसमुदायेयस्यैकस्यापिसंनिहितंसाधारणधर्मप्रतिपादकं क्रियापदंगुणपदंवायदान्यदपिदीप
यतिसाधारणधर्मसंबंधिनेनद्योतयतितद्दीपकमितिकेचित्तुएकस्यकारकस्यअनेकक्रियासंबंधेपिदीपक
माहुः तदुभयमपिनपरीक्षाक्षममिलक्ष्येस्तोअन्यधर्मान्वयसंबंधासंगतोवस्फुनोद्वयोः॥ प्रतिबिंबसमाख्यां
तंक्षिप्तंतन्नानदर्शना॥ यत्रउपमानोपमेययोर्मध्येन्यधर्मस्यान्वयसंबंधासंभवेनप्रतिबिंबेनक्रियाक्षिप्यतेत
न्नानिदर्शना। साद्विधाप्रकृतधर्मस्यअप्रकृतसंबंधासंभवमूलाअप्रकृतस्यप्रकृतसंबंधासंभवमूलाचेति
यथापरिष्टीकृतेरघुकिरीटमणेः चटुलःप्रतापस्तिरिनःपटिमा॥ शातकोटिपूर्जरिलललाटनटस्फुटलोचनोत्क
टमहःपटले॥अत्ररामप्रतापटिम्नादंभोलिसंबंधासंभवेनसादृश्यात्दंभोल्याद्युपमानप्रतिबिंबंनकरणमा
क्षिप्यतेत्वद्वोर्मंडलमंडलाग्रतिलकारामक्षमामंडनश्रीखंडद्रुमकांडकुंडलिगतंपांडित्यमाहिंडते। शेषात्फण
फणाग्रनिर्गतविषज्वालाश्रियंसाश्रयत्यादत्तेप्रलयांतकोद्भटभुजादंडाकृतिंअत्रप्रकृतस्यरामभुजरवद्रूस्यश्री दंडाग्र
खंडगतकुंडलिशेषविषज्वालाकालदंडधर्मसंबंधासंभवेनतत्सधर्मसदृशधर्मानाकलयतीतिबिंबप्रतिकरणमा
क्षिप्यतेक्वचिन्निषेधेभाक्षिप्तयातदाक्षेपः कांतारांतरचारिण्यः कांतारामविरोधिनां॥ सरोवारिजनेत्राभ्यांमुंचतीं
दीवरश्रियं॥अत्रमुंचतीतिविरोधात्पूर्वमिंदीवरश्रीराक्षिप्ताव्यतिरेकस्तत्समानादुपमेयातिशायिता॥नग्नक्षप
णकस्तमसानचान्हिमालिनोदर्शनोकरीतोनेरास्तंगतिवित्तनचांकिततनुर्नोपाक्षिकश्चारपि॥ लोकालोकनगेंद्रलं

घनविधौनोपंगुभावंगतोनिर्दोषोगुणसागरादृघुपतेर्जातोयशश्चंद्रमाःअन्नरामभद्राकीर्तिचंद्रस्यप्रसिद्धचंद्रादुपमा
नादाधिक्योपनिबंधनेनभेदप्राधान्यमोपम्यंगम्यते॥ एकस्योक्तिःप्रधानत्वेनान्यस्यस्यात्सहार्थतःऔपम्यंगम्यतेय
त्रसहोक्तिरुक्तत्रकथ्यते॥ मनोपमानोपमेयभावेविवक्षितएवैकस्यप्राधान्येनानिर्देशःअन्यस्यचसहार्थसंबधप्रा
धान्येनचौपम्यंचगम्यतेतत्रसहोक्तिःइयंभावाभावाभ्यांप्रवर्तते॥ यशालस्वद्गभिन्नमदबंधुरसिंधुरेंद्रकुंभस्थलोच्च
लितमौक्तिकतारकाणां॥ संधैःसमंसमरराजिमुरोवितंद्राप्रोद्यंतिराघवमणेतवकीर्तिचंद्रा॥१॥उद्दामकार्मुकविजृं
भितरामभद्रधाराधरोग्रशरवर्षपरंपराभिः॥ करालजुषांदिविषदांहृदिशोकवन्हिर्देत्यप्रतापतपनेनसमंशशाम॥१॥
विद्यानाथरूककार्यकारणयोर्वापर्यविपर्ययरूपातिशयोक्तिमूलाभेदातिशयाभिधानरूपातिशयोक्तिमूलाचसहोक्ति
रुक्तरूपान्॥ तन्मतेउस्तिसंसहकोक्तिकस्यचुलकेरिखादोसहोक्तिर्नस्यात्अथेतत्प्रतिकोटितयाविनोक्तिंलक्षय
ति॥ विनोक्तिःसाविनार्थोक्तेयास्यादोपम्यगम्यतायथाविनाशेषेणयातालंविनेंद्रेणत्रिविष्टपं॥ विनाश्रीरामचंद्रेण
नराजतिधरातलं॥१॥ अन्नस्वर्गपातालयोःस्फुरेंद्रभुजगेंद्रावंतरेणयथानशोभातथाभूतधात्रीतलमाघिरामंवि
नानशोभतइतिवशोभ्यागम्यमौपम्यं॥ यत्रत्वेवमौपम्यपर्यवसानंनास्तिनतन्नायमलंकारः॥ यथाविनावत्सरा
मःकथमयमयोध्यांप्रविशतिइत्यादौ॥ सहोक्ताववमेववेद्यं॥ समासोक्तिंवक्तिविशेषणान्येवपरमार्थेन्यंजयितुंम
प्रकृतस्यसमर्थानिसमासोक्तिस्तदाभवेत्॥ प्रकृतस्यविशेषणान्येवअप्रकृतमर्थंयदागमयितुंशक्तानिनतुविशे
ष्यपदमपितदासमासोक्तिःसमासेनसंक्षेपेणअर्थद्वयस्योक्तिरियमन्वर्था॥ विशेषणविशेष्याभामर्थांतराप्रती
तेर्नश्लेषता॥ ननुसमासोक्तावप्रकृतारोपणस्यगम्यताङ्गम्यरूपकसांकर्यशंकादुर्वारितिचेन्मैवं॥ प्रस्तुतोपरंजकत्व
मात्रोपयोगादप्रस्तुतस्यनचपरिणामांतर्भावःआरोपविषयस्यआरोपमाणतयापरिणामेआरोप्यमारोपप्राधान्ये
नआरोपविषयतिरोधानंहिपरिणामालंकारप्रयोजकंआरोप्यमाणस्तुसादृश्यवैशिष्टपप्रतिभामात्रेणआरोप्य
माणगम्यतानुपमर्देनारोपविषयस्यैवप्राधान्येनप्रतीतिः॥ समासोक्तेरयोजिकेतिरहस्यं॥ यथाभवद्बाहादंथा
चलमथितनक्रंचरचमूसमुद्रात्समभूतासहविजयलक्ष्म्यारघुपते॥ भवत्कीर्तिर्धार्याजयतिभुविसर्वंसहसिरसा
तमोहंत्रीनिलंकुमुदमुदयंप्रापितवती॥ इहकीर्तेःचंद्रत्वंध्वन्यंतदपिविशेषणसामर्थ्यादेवनाविशेष्यसामर्थ्या

२८

तासंभ्रमः॥अप्रस्तुतेनवाक्येनप्रस्तुतंगम्यतेयदि॥अप्रस्तुतप्रशंसेयंकथितापंचधाबुधैः॥यत्राप्रस्तुतस्या
प्रस्तुतत्वादेववर्णनमनुचितंसत्प्रस्तुतंगमयतितत्राप्रस्तुतप्रशंसाअप्रस्तुताक्षेपश्चयत्किंचि
संबंधाभावेनसंभवतीतिसंबंधःकोप्यंगीकार्यः सन्निधासारूप्यंसामान्यंविशेषभावः कार्यकारणभावश्चेतितं
निबंधनाचेयंपंचधाभिद्यतेसामान्यात्विशेषाक्षेपः॥विशेषात्सामान्याक्षेपः॥कार्यात्कारणाक्षेपश्चेतिद्वितीयत
तीययोरेकैकस्यद्वैविध्यात्क्रमेणयथा॥भृंगपुंगवमरंदनिर्झरीसद्मपद्ममपहायसांप्रतं॥जालमशाल्मालि
मुपेषिकिंवृथाशोकमाकलमितुंकिमीहसे॥अत्राप्रस्तुतेनभृंगबुध्युपदेशेनसर्वानर्थीनान्पुरुषाधमान्वि
हायसकलशुभगुणमणिसिंधुःसीताबंधुरेवस्फुधियांसेव्यइतिप्रस्तुतमवगम्यते॥अथवा॥भानोर्भानांतरिक्षे
विलसतिनचसंराजतेराजतेजोवन्हावन्हायरोचीरजनिषुपिहिताशांतरंशांतरंहःस्वैरंस्वैरंशुजालैःसहच
रतिरवोकांतिकेकांतिकेलिःसंवासंवासिशक्तःकिमुतिमिरसखद्योतखद्योतकर्तुं॥सरूप्यालंबनेनेदमुदाहरणं
द्वयंप्रहर्तृसामान्याद्विशेषधीर्यथा॥रामविक्रमाविघातकौशिकाःकौशिकाध्वरविरोधिनोसुराः॥पत्त्रिभिः
पवनवेगजित्वरैर्जित्वरैर्कीर्तिनरखंडितास्त्वया॥इहमहादिदमद्भुतंयद्रामशिशुनेबलयाकौशिकमखविरो
धिनोसकलाद्युधिसुराःसकलविरोधिनाखंडिताइतिसामान्यमुपन्यस्तंतेनप्रस्तुतासामान्यात्प्रस्तुतोविशेषोव्य
ज्यतेविशेषात्सामान्यधीर्यथा॥श्रीरामभद्रेसततमशेषाभीष्टदायिनी॥दारिद्र्यंविदुषांलेभेस्लेर्यंमध्येषुयो
षितां॥अत्रश्रीरामभद्रौदार्येणसर्वेषामर्थिनांदारिद्र्यंहृतमितिवक्तुंयोविदुषामितिविशेषस्याप्रस्तुतस्यो
पादानात्प्रस्तुतमेवसामान्यंव्यज्यतेयथावा॥रामभद्रेणसंश्लेषमिंद्रेणेवामरावती॥समासाद्यसदामोद
मविंदतवसुंधरा॥अत्रयोग्यंवस्तुयोग्येनवस्तुनायोगमेत्यशोभतइतिसामान्येविवक्षितेवस्तुविशेषोभिद्य
तेतेनसामान्यंयुज्यते॥कार्यात्कारणव्यक्तिर्यथा॥श्रीरामवीरविभुवेश्मविलासशैलकासारगर्तसरकासर
सारसंघे॥क्रोधोत्कटानसहदुच्छलतोविमार्गसंचारिणोरुणहयानरुणोरुणद्धि॥अत्रश्रीरामचंद्रभयेनस्व
रहान्विहायशत्रवःकुत्रापिचिरायकिलीनाइतिकारणेप्रस्तुतेतत्कार्यमुपवर्ण्यमानमप्रस्तुतमेवप्रस्तु
तंस्वकारणंव्यंजयतिकारणात्कार्यधीर्यथा॥औदार्यरामभद्रस्यविस्पष्टंदृष्टपत्रयेकथंविस्मयसेदृष्ट्वा

कामधेनुसुरद्रुमान्॥अहोकथमेतत्कामधेनुकल्पद्रुमादीनाअर्थिजनेषुदानवैमुख्यमितिविस्मयमानंप्र
तिकस्यचिदिदंवचनंततश्चप्रस्तुतेनौदार्येविस्पष्टतारूपेणकारणेनवाक्येनप्रस्तुतस्यलज्जितत्वरूपस्यप्र
तीतिः अथान्येनान्यगमनसाम्येनबुध्यिस्थतयापर्यायोक्तालंकारंलक्षयति॥प्रस्तुतेनोच्यमानेनकार्येणप्रस्तु
तंयदि॥कारणंगम्यतेतत्रस्यात्पर्यायोक्तमलंकृतिः॥प्रस्तुतेनेतिविशेषणेनअप्रस्तुतप्रशंसाव्यवच्छेदः का
र्योक्त्याकारणमपिपर्यायेणोक्तमितिपर्यायोक्तपदप्रवृत्तिः॥कार्याभिधानभंगिनेपुण्येनकार्यस्योक्तप्राय
त्वमेवेतिनव्यंग्यत्वंननुतर्हिसाक्षात्कारणमेवकिंनोच्यतइतिचेत्नकार्याभिधानमुखेनतस्यप्रत्यायनेया
वतीचमत्कृतिःतावत्यास्तदाभावात्॥यथा॥रक्षङ्गस्यतेयुधिविरोधिनराधिपेषुकाप्रक्रियारघुपतेयदमी
स्तमेताः॥दुष्प्रापदिव्यरमणीरमणीयहेमवक्षोजशैलशिखरेषुचिरंचरंति॥अत्रशत्रुनराधिपानांदुष्प्र
आपदिव्यकामिनीकुचकांचनाद्रिकूटकेलिरूपकार्यस्यप्रस्तुतस्यैवोपवर्णनामुखेनतत्कारणभूतंयु
धिरामस्यवक्षेनखंडनप्रस्तुतमेवप्रत्याय्यते॥पर्यायबलसाम्यात्पर्यायंलक्षयति॥क्रमादेकमनेकस्मिंन
नेकमपियत्नवा॥एकस्मिंवर्ततेतत्रपर्यायालंकृतिंविदुः॥क्रमविशेषणंयुगपदनेकत्रैकस्यावस्थानरूप
विशेषालंकारव्यवच्छेदनार्थंविनिमयाभावान्नपरिवृत्तिताअत्रआद्योदाहरणंमध्यायोगेवरूणभंगनिरूपण
कंपद्यं॥तद्घाटीतीव्रघोटीखुरपुटपटलीपाटितस्मासमुध्यधूलीपालीभिरध्वोसपादिचुलिकिते तत्र
तापानलेन॥सेनांबोधोचदग्धेस्वयमयतिभयाच्चाभिमानंबुराशेःप्राविक्षत दृष्ट्वाधिंतद्भुविगलितो
पप्लुवंसप्रचेताः॥अत्रैकस्यैववरुणस्यक्रमादनेकाध्यिषुवृत्तिःकथिता॥काष्ठंकपालंकटुकंदमूलंकरेरिपोः॥
संयतिगर्वितस्य॥तिष्ठतिपश्चाच्छरणंगतस्यरामप्रभुंकलपशरावपद्माः॥अत्रअनेकेषामेकत्रक्रमाद्वृत्ति
अत्रव्यत्ययोःपरिवृत्तिविशेषयोःपरिवृत्तिंताबलूसयति॥परिवृत्तिर्विनिमयोधिकाल्पसमजंस्त्रिधा॥
विनिमयोनामवस्त्वंतरदानपूर्वकोवस्त्वंतरस्वीकारःसत्रैधाभधिकवस्तुदानेनाल्पवस्तुस्वीकारःअल्पवस्तु
दानेनाधिकवस्तुस्वीकारःसमेनसमस्वीकारश्च॥क्रमेणयथा॥किरीटिरास्तांवरदिव्यभोज्यान्युत्सृज्य
तोरिर्जगृहेस्मराम॥काष्ठोत्करंमूर्ध्निकरेकपालंकटोकुचेलंकवलेचकंदं॥ ॥प्रणामंजालमान्नतेप्र

तिपाद्यविभाषणः॥ लंकाराज्यंस्वयंप्राज्यंत्वत्तोजग्राहराघव॥ वितीर्यहृदयंस्वीयंसीतायैरघुनंदनः॥ तदीयंहृ
दयंलेभेकुरुक्षमायुधसाक्षिकं॥ विशेषमाह॥ एकस्ययुगपद्धृतिर्यत्रानेकेषुवर्ण्यते॥ विनाधारंतथाधेयंघटनादुर्घ
टस्यच॥ विशेषालंकृतेर्भेदास्तत्रेथंबुधाजगुः॥ तत्रोदाहरणंयथा॥ भेरीभूरिविरावडंबरभरोद्भटाशकनेशत्रूणां
हृदयांतराणियुगपद्भग्नाशाद्दशाव्यानशे॥ त्यक्त्वातान्परिधावतोगुणमणेरत्नानिसंतस्थिरे॥ रामत्वाशरणागते
त्यधिगताश्चैतादृशंसंतानकाः॥ अत्रक्रमयोगेपद्यप्रस्तावप्रासानूपरिसंख्यादीन्लक्षयति॥ वस्तुष्वेकमनेक
केषुप्रासंयत्रनियम्यते॥ एकत्रैवभवेत्तत्रपरिसंख्याचतुर्विधा॥ इयंप्रश्नपूर्विकान्याचेतिद्विधा॥ पुनःप्रत्येक
मेनीयस्यार्थस्यशब्दलाभ्यांद्वैधेतिसंधायचतुर्विधा॥ परिसंपूर्वस्यख्याधातोर्वर्जनमर्थः॥ सिताःशीताःपू
ताःकथयशुचेरघवगुणा॥ नगंगायाःपूरानचशशिकरानाम्रतरुराः॥ हितान्दत्तेधत्तेक्षितिमपिचकः कोसल
पतेभुजादंडश्चंडीपतिकठिणकोदंडदलनः॥ इदंप्रश्नपूर्वकयोः शब्दार्थवर्जनीययोः परिसंख्ययोरुदाहर
णंइहद्वितीयार्धेरामसुजएवअर्थिनांअभिमतार्थान्वितरतिसएवक्षितिंबधनइत्यत्रकेरर्थान्नचिंतामणिसं
तानकादयोवितरंतितथाभुवंगपुंगवादिद्भातंगादयश्चनमहींवहंतीतिगम्यमानत्वाद्वर्जनीयानामर्थिकत्वं
विद्यं॥ स्मितज्योत्स्नापूरःशिशिरमधुरस्तेरघुपतेनगोस्तन्यंगोस्तन्यमपिचनासितानापिचसुधा॥ प्रतापस्यस्फू
र्तेःशिशिरधवलाकीर्तिरपितेमहींलोकालोकाचलवलयितामुज्वलयतः॥ अत्रापिद्वितीयार्धेरामप्रतापकीर्त्यो
रेवपृथिवीप्रकाशकत्वोक्तेरर्थान्नस्तूर्यचंद्रमसोरितिगम्यमानत्वाद्वर्जनीयार्थयोरार्थिकत्वंदर्शयितुमितरयोरुद्ध
रणं॥ श्लेषालंकारसंश्लिष्टपरिसंख्याविशेषतः॥ चमत्कारोतीतिदृशाकवयः केपिलोलुपाः॥ यथा॥ दानांबु
यशोरिपुद्विपकटेसस्येषुनीतिःपरंनीचोपस्थितिःपंकयोगजडताभंगभ्रमाःसिंधुषुस्थाणुषेवविपल्ल
वस्थितिरभ्रूह्वायोविमार्गभ्रमोनेतालिंचिदपिप्रजासुकदृशोरामेक्षितिंरक्षति॥ समुच्चयंलक्षयति॥ क्रिया
णांवागुणानांवायुवगपद्यत्रमेलनं॥ एकत्रवर्ण्यतेतत्रद्विविधःस्यात्समुच्चयः॥ यथा॥ वधूवहनभूनभश्च
रतूर्णवक्रक्रमैःस्फुरंगतिकुरंगतिद्रुतारिपुर्विहंगत्वपि॥ भुजंगतितरंगतिह्रदगतोवनेभंगतिस्फुलिंग
तितमस्यपितवारिणेरघोत्तुंगति॥ अत्रक्रियाणांसमुच्चयः॥ गुणसमुच्चयोयथा॥ रामस्यचक्षुषःकोणेक्षणेशो

DR. BHAU DAJI MEMORIAL

शोणेरुषाद्विषांपांडिमाजडिमावांगेजडेमलिनिमाणिमा॥ एवंक्रियागुणमेलनवशात्समुच्चयालंकारस्यविधायेदं
मेवोचुः प्रांचः वयंतुद्रव्यजातिसमवायेरचितद्वैतांब्रूमः॥ क्रियागुणसमुच्चयोरिवानयोरपिचमत्कार का
रिताया प्रागुक्तस्यालंकारसामान्यलक्षणस्यचदुरपलापत्वात्तत्रद्रव्यसमुच्चयोयथा॥ काष्ठंकपालशकलंक
मलंतृणानांवैरिः करेकलयतेलघिरामरुष्टे॥ तुष्टेतुकल्पतरुकांडसुधांकमांडचिंताश्मनीलवरकछपशंखपद्मा
न्॥ अत्रपूर्वोत्तरार्धगतयोः काष्ठादिकल्पतरुकांडादिद्रव्यराशिसमुच्चयोवैरिजनेकेककरेयुगपत्संभवा
न्नद्विवारमुदाहरणंबोध्यं॥ तदभेदेयुगपदेककरेविरुद्धद्रव्यराशिद्वयस्यमेलनासंभवाद्द्रव्यविरोधश्चनतु
पकयोरोषतोषयोर्युगपद्वृत्त्याविरोधात्॥ राशिद्वयस्यापिक्रममेलनाविवक्षायांतुपर्यायालंकारतास्यात्परापर
भावशून्यानांविरुद्धसामान्यानांयद्यप्येकत्रसमवायोनसंपद्यते॥ यद्यपिकवेरुक्तिश्चातुर्यात्समवायः संभवत्येव
यथा॥ शुचित्वनरसिंहत्वराजहंसत्वभागितामूधरत्वादयश्चान्याजातयोराघवेवभुः॥ एवंद्रव्यगुणक्रियासा
मान्यानांप्रत्येकंमिथश्चमेलनेएकादशभेदाः संभवंतिसमुच्चयालंकारस्यावर्त्तभयान्नोदाह्रियंते॥ तत्करंल
क्षयति॥ खलेकपोतन्यायेनमिलितेर्बहुकारणैः॥ स्वतंत्रैःक्रियतेकार्ययत्रैकंतत्रतत्करः॥ मुग्धागिरोविहसिता
निसितानिहावाभावाश्चमंजुमधुरामधुराम्गास्याः॥ कंदर्पवेभवपुषोवपुषोपिशोभारामस्यमानसमुदंसय
दंचयंति॥ अत्रखलेकपोतन्यायेनमिलितैरितिविशेषणात्समाधेर्व्यवच्छेदः तन्नकारणमेलनस्यकाकतालन्यायसि
द्धतात्समाधिंलक्षयति॥ काकतालनयायातहेतोरन्येनहेतुना॥ प्रक्रांतकार्यसोत्कर्षेसमाधिःस्याद्दलंकृतिः॥
काकतालनयेतिविशेषणात्तूत्तत्कराद्देरः॥ यथाभंधान्मथेनरघुरामचमूसमुत्थधूलीभरोंधयतिविद्रवतोद्विष
स्ते॥ नक्तंतनंतिमिरमापतितंपुनस्तानंधीचकारहतमेवविधिर्निहंति॥ किंकल्पंजल्पति॥ तुल्यप्रमाणवैशिष्ट्या
द्युगपत्प्राप्तयोः क्वचित्॥ विरोधश्चेत्सदृशयोर्विकल्पंतत्रजल्पतु॥ तुल्यंहिविरुद्धद्वयंयुगपदुपस्थितंविकल्प
तेहं। तेनयत्रतुल्यप्रमाणवैशिष्ट्यात्समबलयोर्द्वयोरेकत्रयुगपत्प्राप्तोविरोधः स्फुरतितत्रविकल्पालंकारः
यथा॥ भुविवादिदिवास्थलेजलेवाभुजदंडेरथवाप्रचंडकांडैः॥ तवरामयथास्थितत्रशिक्षावदरैत्रेवमधंत
थाविधास्ये॥ इदंरावणवचनं॥ अथयथासंख्यमाख्याति॥ संबंधः प्रथमोक्तानांचरमोक्तैः क्रमाद्यदि॥ क्र

कथयंतिययासंख्यालंकारसंभवेद्विधा॥ शाब्दश्चार्थश्चेतिद्विविधोयथासंख्यालंकारः॥ तत्रासमस्तानामस
मस्तान्वयेशाब्दतासमस्तानांमिथः संबंधेआर्थतासमानयोर्मिथः संबंधेशाब्दतः प्रतिपन्नेतदंतर्वर्तिपदानां
क्रमसंबंधिस्याक्षेपलभ्यत्वात्॥ यथा॥ रविकविरुषाकपीन्द्विजिग्येरामोद्युतिनीतिभूभृधातिभिः॥ तस्यच
नेत्रंवक्त्रंगात्रंकमलंकलानिधिंकामं॥ अत्रआर्थशाब्द्योरुदाहरणद्वयंपूर्वोत्तरार्धयोर्वैद्यंअथा॥ क्रमाव
लंबनेनश्रृंखलान्यायमूलान्कारणमालादीनलंकारान्लक्षयति॥ पूर्वपूर्वंयत्रभजेदुत्तरोत्तरहेतुतां॥
तत्रकारणमालाख्यमलंकारंप्रचक्षते॥ केचित्तहेपरिलेपिपोषकत्वेपितंपरे॥ उत्पत्तौपोषणेवाकारणत्व
स्यानपायादितितेषामभिप्रायः। तेनास्यचत्वारोभेदाः तन्निदर्शनमात्रमुदाह्रियते॥ लंकादृप्यद्विपवरघटाक
र्णतालाविलोलाः स्वर्गस्त्रीणांभ्रशमजनयन्दीर्घनिश्वासवातान्॥ इंधांचक्रूरघुकुलपतेस्तस्तापानलं
तेतेनघुष्टंदशमुखभुजाकंधराश्रेण्यरण्यं॥ पूर्वपूर्वकृतोत्कर्षंभजेच्चेदुत्तरोत्तरं॥ तन्मालादीपकारव्यमु
लंकारंबुधाजगुः॥ यथाभूतिंयोवनमातनोज्ज्वलकजालावृण्यशृंगारयोः॥ स्ताभ्यांकाचनचातुरीवचनदुर्भे
गाभिरंगीकृता॥ कंदर्पोविदधेचतांतुकिमुनाबाणैर्बुभूषेधनुस्तेनाप्यस्यविदार्यधैर्यकवचंरामस्यभिन्नंमनः
पूर्वस्मादपिपूर्वस्मात्सारंचेदुत्तरोत्तरं॥ यत्रवर्ण्यतत्तत्राहुः बुधाःसारमलंकृतिं॥ ब्रह्मांडसारोभुवनानि
सप्तभूमंडलीतेषुचसारभूता॥ तत्सारभूतानिपुराणितेषुसारः पुरंराघवबाहुगुप्तं॥ विशेषणंपूर्वपूर्व
स्योत्तरोत्तरमुच्यते॥ एकावलीमलंकारमूचिरेतत्रपंडिताः॥ यथारामबाहुः शौर्यधुर्यः स्तन्नीत्यानिक्षमानि
तं। नीतिवित्तेनत्रपन्नावित्तंसत्यात्रसत्कृतं॥ अथतर्कवाक्यन्यायमूलान्काव्यलिंगादीनलंकारान्लक्षय
ति॥ हेतोर्वाक्यपदार्थत्वेकाव्यलिंगंद्विधाभवेत्॥ यत्रहेतुः पदार्थोवाक्यार्थोवाभवन्नुक्तार्थसमर्थकः स्यात्
तत्रकाव्यलिंगं॥ तच्चोक्तरीत्याद्विधापदगतत्वेपिविशेषणत्वेनैवहेतुत्वंकार्यं। यत्रपुनस्तुतीयादिनाहेतुत्व
धीः नतत्रासावलंकारः। किंतु हेतुमात्रंचमत्काराभावात्॥ नचानुमानाभेदशंका॥ ज्ञाप्यज्ञापकभावाभावात्
व्याप्तिपक्षधर्मतयोः रत्नुपसंहाराच्च॥ समर्थसमर्थकभावोहिप्रकृतेभिन्नेतः नचअर्थांतरन्यासाभेदशंका॥ प्र
कृतेसमर्थ्यथासमर्थकवाक्यार्थयोराकांक्षासद्भावस्यप्रयोजकत्वस्वीकारात्अर्थांतरन्यासेतुसमर्थ्यसम

र्थकवाक्यार्थयोराकांक्षाभावात्॥ कथंतर्हिसमर्थनंउक्तापिलाकांक्षयोरपितदुपपत्तेः॥ पदगतः यथा॥ गूढास्त्वा
मेवमन्यानारामभ्रांतिद्विषोमिथः पलायंतेस्मनक्वापिपश्यंतश्चसमंततः॥ अत्रभ्रांतत्वंहेतुः॥ सचविशेषणत्वे
नेवरिपून्विशिनष्टि॥ वाक्यगतंयथा॥ लंकेशकिंकरगणैः सहमाहिदूरं चंडोत्थमापततिराघवकांडवन्हेः॥ रिं
गत्तरंगगगणंबधुरसिंधुबंधुनिःशेषशोषणविभीषणदृष्टसारः। अत्रलंकेशपलायनरूपसाध्येप्रथमपादवा
क्यार्थेतदुत्तरवाक्येनहेतुर्निरूपितः। अत्रव्यावर्त्ततयाबुद्धिस्थयोरर्थांतरंन्यासानुमानालंकारयोरर्थांतर
न्यासंलक्षयति॥ सामान्यंवाविशेषेणविशेषोवातदन्यतः॥ समर्थ्यतेयत्रतत्राहुरर्थांतरंन्यासईरितः। अत्रसा
मान्यविशेषयोर्वाच्यत्वंदृष्टांतालंकारेतुसामान्यविशेषयोरेववाविशेषयोरेववाव्यत्वमितिअनयोर्भेदः॥ अर्थांहिवि
धोपिसाधर्म्यवैधर्म्याभ्यांप्रवर्तमानश्चतुर्विधोभवतितत्रसाधर्म्यात्सामान्येनाविशेषसमर्थनंयथा॥ रामत्व
करिडंबरास्तवभुजात्वास्त्रिसकोसेयकात्संत्रस्तानकुलाचलानपिसमारोढुंयतंतेहिषः॥ वीसंतेचनकुंड
लोद्घटितश्रीरंडकांडास्तआत्रायस्त्रासमुपैतिवैरिसदृशात्त्रस्नुः समस्तादपि॥ साधर्म्यात्विशेषेणसा
मान्यसमर्थनंयथा॥ जगत्त्रितयाजित्वरोप्यपजयीकुतश्चित्द्रवेदवश्यमितिनिश्चयान्नदनुमीमहेमावयं॥
सतादृगविरावणोस्करवरोह्यभूद्रंगवान्रघुक्षिपपुंगवादहहसंगरप्रांगणे॥ वैधर्म्यात्सामान्येनाविशेषसम
र्थनंयथा॥ शेषेणदुर्लभरघूद्वहबाहुसाम्यसिध्येसमारणभुजाशुचिनास्थिरेण॥ कूर्मासनेनचनपःक्रियते
विरेणकोवानदुर्लभतमेपिकरोतिवांछां॥ वैधर्म्याद्विशेषणसामान्यसमर्थनंयथा॥ अन्यद्दूरत्वन्यवस्तुप्रकृ
तिमनुभवत्येवहेतोः कुतश्चित्सञ्जातदूरपूर्वप्रकृतिमनुसरत्येवहेतोः परस्मात्॥ योषापाषाणभावंनकिमु
पगतवतीगोतमोद्भूतकोपात्पाषाणोवानयोषापुनरपिकिमभूद्रामपादाब्जरेणोः॥ अनुमानालंकारोथ
॥ साध्यसाधनमात्रोक्तावनुमानमुदीरितं॥ तर्कानुमानरूपाभ्यांतल्लक्षणाद्द्वैविध्यंभवेत्॥ यत्रकिंचित्ज्ञाप्यंकिं
चिन्निर्दिश्यतस्यज्ञापकतयाअन्यंनिर्दिश्यते॥ तत्रअनुमानालंकारः॥ अत्रमात्रव्याप्तिपक्षधर्मतयोः प्र
दर्शनंनिरस्यतेतयोरपिप्रदर्शनेतर्कानुमानत्वापातात्वस्तुतस्तुताभ्यामत्रभवितव्यमेवतदभावेकाव्यलिं
गादभेदापत्तेः किंचअत्रकविनिर्मितचातुरीमहिम्नाश्लेषरूपकापन्हवातिशयोक्त्याद्यलंकारावलंबनेनअ

नुमानोत्थानेनतार्किकपरिपाटीकलंकइतिचमत्कारकारिताप्यस्योपपद्यते॥अर्थापत्तिभेदंतत्रैवस्यामः॥इदं तर्करूपेणअनुमानरूपेणचाहुधाप्रवर्तते॥यथा॥सीतेवराघवतवासिलताकथंस्यान्नोचेदयोनिजतनुर्न जातिहेतुः॥यद्वारगीष्टभुजंगतयानमाहिनिर्मुक्तयासुदुरपायिपरासुवायुः॥अत्रपूर्वार्धेतर्करूपेण उत्तरार्धेहिशब्देनहेतुत्वद्योतनादनुमानरूपेणप्रवृत्तिरितिवेदितव्यं॥अत्रपूर्वार्धेअसिलतायाःसीतारूपत्वं॥द्वितीयार्धेभुजंगित्वंचव्यापकं॥अयोनिजाकृतित्वाकरनाशवैशिष्ट्यंव्याप्यं॥उभयोःसपक्षेसीतायाम् तायांवृत्तेःपक्षेखड्गलतायांवृत्तेर्व्याप्तिपक्षधर्मताभ्यांखड्गेसीतारूपत्वंगमयति॥उत्तरार्धेप्येवंवेद्यं॥अर्थापत्तिं लक्षयति॥कस्मिंश्चिदर्थेनिष्पन्नेयत्रार्थांतरमापतेत्॥दंडापूपनयेनार्थापत्तिःतत्रह्यलंकृतिः॥नचकेनचि दर्थेनकस्यचिदर्थस्यज्ञापनसाम्यादस्यानुमानांतर्भावःशंक्यः॥समानन्यायोहिअर्थापत्तिप्रयोजकः॥नच समानन्यायस्यव्याप्तिरूपता॥अनुमानंतुव्याप्तिमुपजीव्यप्रवर्तते॥ततोनवात्रास्यांतर्भावः॥आक्षेपांतर्भा वस्तुवस्यमाणतल्लक्षणाद्वानिरसनीयः॥अयमलंकारः॥प्रकृताप्रकृताक्षेपःअप्रकृताल्पकृताक्षेपश्चेति द्वेधा॥यथा॥जगान्नितयाजिवरंकिलदशाननंसत्वरंजिगायसमरांगणेकिंमुतदेत्यमात्रंविधुः॥निपीत जलधिर्मुनिर्ग्रसितविद्विषन्निल्वलंनिपातुमतिहेलयाभवतिखल्वलंपल्वलं॥अत्रप्राकरणिकोरावणजयो प्राकरणिकमस्करमात्रजयंकेसुत्तिकन्यायेनार्थादाक्षिपति॥भंगोद्भूतविरावडंबरभरैर्ब्रह्मांडभंगावहैः कोदंडंनिजमिंदुरंडमुकुटोबुध्वाभवत्खंडितं॥अस्तोपीत्किलहर्षकंपितशिरोरोगगंतरंगारवैस्त्रांरामास्फुट वाग्भरेणकिमुतासन्नाजगन्नायकाः॥अत्राप्रकृताशिवस्तवदर्शनात्प्राकरणिकसीतास्वयंवरायातसर्व सर्वंसहापातिस्फुतिमर्थादापादयति॥आक्षेपंलक्षयति॥उक्तंवावक्ष्यमाणंवाप्रकृतंप्रतिषिध्यते॥किं चिद्विशेषंद्योतयितुंतन्नाक्षेपंप्रचक्षते॥अत्रप्रकृतस्यप्रकृतत्वादेवअभिधानार्हस्याक्रियमाणोनिषेधो बाध्यमानतयाभासीभवन्विधिमाक्षिपसोयंनिषेधउक्तवक्ष्यमाणाविषयतयास्तोपजीविनमाक्षेपम पिद्विधाभिनत्ति॥तत्रउक्तविषयोपिद्विधः वस्तुविषयःकथनविषयश्चेति॥वक्ष्यमाणविषयोपिद्विवि धः सामान्यरूपेणाभिधित्सितस्यविशेषरूपतयाकथननिषेधः अंशांगीकारेणअंशांतरनिषेधश्चेत्ये ३२

षांचतुर्विधआक्षेपः॥यथा॥रामोनभवतुधन्वीतथापिरोषेणशोणदृक्कोणः॥विद्भेधन्वानमयनूधन्वानमयनूक्ष णाद्दन्वंतं॥रामोधन्वीनभवत्वितिप्रलपतोरावणस्यप्रतिवचनेक्रियमाणेधन्विरूपस्यवस्तुनःप्रकृतस्यप्र तिषेधोबाधादाभासीभवन्सप्रसुद्दस्यापिनियमःनात्रामएवधनुर्धरधुरंधरानेतरइतिप्रतिपादनपुरःसरं सत्वरंसीतांरामायसमर्प्यकुशलीभवेतिविशेषमाक्षिपति॥कथननिषेधोयथा॥ब्रह्मन्भ्रमद्भूद्दहरघूद्दहमंड नस्यदोर्दंडचंडिमभरंनवयंभणामः॥तद्भग्नभग्नशशिभूषणचापघोषःखिन्नाभ्यधत्तदलितद्रुहिणांडभांडः॥ इदंकमयकीदृक्तेभुजसारःममचापमारोपयेतिराममाक्षेपकरंजामदग्न्यंप्रतिलक्ष्मणस्यप्रतिवचनंअत्रनभण मात्रातिक्रियमाणेनभणननिषेधाभासेनतादृक्चंडीशकोदंडंखंडितवतोरामभुजदंडस्यकीयतवब्राह्मणस्य चापारोपणंअतोअस्माद्दुर्व्यसनाद्दूरमितिविशेषोव्यज्यते॥वक्ष्यमाणविषयेसामान्यप्रतिज्ञायांविशेषनिषेधो यथा॥रामभद्रविसुरवीमहंसरवींलोचनैःकिमपिवक्तुमागता॥नब्रवीमिनलुवेत्सिजानकित्वंचपंचशरबाण संचयं॥इदंप्रतिसरवीवचनंदूरेकिमपिवचोवक्तुमागतेतिसामान्यंप्रतिज्ञायाविशेषस्यवक्ष्यमाणस्यकथननि षेधाभासेनसखिवेमुख्यंजहीहिपादप्रणतेरघुपतौप्रसीदनोचेत्तुदुःसहंस्मरशरसंतापमेष्यसीतिविशेषो ध्वन्यते॥अंशोक्तावंशांतरनिषेधोयथा॥चंद्रःकिमेषनसपार्श्विकःकांतिमेतिपूषाकिमेषनसयातिनभोगमा र्गं॥वन्हिःकिमेषनजलेनसहानिमेतित्यमत्रयरामसगुणोस्त्वयिनिश्चयस्यात्॥अत्रनिरतिशयतेजःशालि तयाशीतभानुभानुरूपतायामेकदेशमंगीकृत्यएकदेशांतरनिषेधःक्रियमाणःप्रसिद्धैरपितेजस्विभिःसोमादिभिःरपितत्साम्यदुर्लभमभूत्किमुतेतरैस्तेजस्विभिरितिरामतेजसोवाङ्मनसपदवीदवीयस्ता व्यस्ता॥व्यज्यते॥आक्षेपप्रस्तावात्व्याजस्तुतिंलक्षयति॥यत्रवाच्यास्तुतिर्निंदानिंदावास्तुतिमर्पयेत्॥तत्रव्या जस्तुतिंनामलंकारंकवयोजगुः॥यत्रामिधीयमानानिंदाप्रकृतेस्तुत्वेप्रमाणबाधितासतीस्तुतिमर्पयतिस्तु तिर्वानिंद्येतादृशीनिंदांतत्रव्याजस्तुत्यलंकारः॥व्याजस्तुतिशब्दश्चस्तुतेर्वाच्यत्वेनिंदायाव्यंग्यत्वेव्याजरूपा स्तुतिःतत्रातद्द्वैपरीत्येव्याजस्तुतिरितिचप्रवर्ततेननुस्तुत्येनिंदायाःअप्रकृतायाःक्रियमाणायाःप्रकृतस्तुत्या क्षेपकत्वमेकत्रपरत्रस्तुतेर्निंदाक्षेपकत्वमित्यप्रस्तुतप्रशंसात्वमेवेतिचेत्सत्यंतथाविधस्तुतिनिंदात्मकविछि

त्यंतरावलंबनेनपृथक्परिगणनमितिप्रांचः।नवीनास्त्वभेदमेवाहुः॥तत्राभिदामास्कृतिधानिर्यथा॥दारिद्र्याह्व्यबांधवैश्चिरतरावस्थायिभिर्दुस्त्यजैःस्वांविश्लेष्यविभूतिमानकलितान्कृत्वावपाश्चिद्गणान्॥बध्वाबाढमसंख्यसंख्यकुणेर्निर्लंगभीरकूपाकूपारेविनिमज्जयन्नरघुपतेर्दीनेदयालुःकथं॥अत्रश्लेषरूपकमहिम्नाभिद्याधिरामेकूपाकुलरूपास्कृतिरेवावगम्यते॥तदुक्षिप्तानांरघुसिंहसंघान्नगुणच्युतानामपिमार्गणानां॥प्राणामिषैःप्रीणयतांरिपूणांविभाणनंवर्णयितुंनशक्यं॥अत्रस्कृत्यानिदाध्वानिःअत्रअश्लेषालंकारेदृष्टानिषेधेबाधिततत्साविरोधानुग्रवेशेनैतत्प्रस्तावादितःपरंविरोधगर्भालंकारपेटिकातर्गतानवशिष्टानलंकाराल्लक्ष्यते॥अभासत्वेविरोधस्याविरोधालंकृतिर्भवेत्॥इतियत्रअपाततःप्रतीतोविरोधःपर्यवसानेपरिहीयतेतत्राविरोधालंकारःपर्यवसानेपिवायाद्विविरोधःतथैवावातिष्ठेततत्तदादोषएवतत्रजातेर्जातिगुणक्रियायांद्रव्यैर्विरोधेचत्वारोभेदाःक्रियायाःक्रियागुणद्रव्यैःनयःगुणस्वगुणद्रव्याभ्यांद्वौद्रव्यस्वद्रव्येणेकइतिसंभूयदशविधोविरोधालंकारः॥यथारामतनयासिभुजगः सोप्युग्रः कामपूरकःकालः॥शुचिरप्यपरप्राणानिलभोक्तांकलयतेपरांकाष्ठां॥अत्रदशविरोधाअपिसंगृहीताःतत्रआसिभुजगइतिजात्योर्विरोधःआसिभुजगशब्दयोर्जातिवाचित्वेनपरापरभावशून्यसामान्ययोःसमानाधिकरण्यादर्शनात्।एवंप्रथमंविरोधःस्फुरति।सचभुजगशब्दस्यकरगततत्तद्रूपार्थस्वीकारेआभासीभवति॥एवंउत्तरत्राप्येकार्थस्वीकारेस्फुरतोविरोधस्यार्थांतरस्वीकारेआभासीभवनंद्रष्टव्यं।सोप्युग्रइत्यत्रतच्छब्दार्थस्यशंभुरूपद्रव्यस्यचाविरोधः।उग्रोपिकामपूरकःकालश्चेत्यत्रद्रव्यक्रिययोर्विरोधःशंभोःकामदाहकत्वेनकामपालनक्रियायाविरोधात्।उग्रशब्दस्यदारुणगुणवाचकत्वेनगुणस्यक्रियायाविरोधःदारुणतागुणस्यदुःखजनकत्वेसुखजनकत्वानुपपत्तेःकालशब्दस्ययमद्रव्यकालिमगुणवाचकत्वेनशंभुयमद्रव्ययोर्विरोधःकालःशुचिरित्यत्रशुचिशब्दस्यवह्नितज्जातिशुक्लिमशुभगुणानांवाचकत्वेनयमद्रव्यशुक्लिमगुणयोर्विरोधःयमस्यकृष्णवर्णत्वात्तथाशुक्लिमकालिमयोर्विरोधःकालिमवह्नितज्जात्योश्चविरोधःतथासशुचिःप्राणानिलभोक्तापरांकाष्ठांकलयतेचेत्यत्रवह्नितज्जातेरनिलभुजिक्रियायाश्चविरोधःवह्नेरनिलसख्यत्वेनतद्भुजिक्रियायावह्नितज्जातेश्चसामानाधिकरण्यविरोधात्तथाअनिलभुजिक्रियायाःपश्चिमदि

ग्पालनक्रियायाश्चविरोधःक्रियाद्वयस्योभिभुजगवरुणयोःप्रीतिनियतत्वात्तुलदेवेंद्रशब्दोपिविरोधालंकारोत्रानिरूपितःश्लेषोपस्थापितःअयमश्लेषमूलोपिसंभवति॥यआशातमुखमुखवद्दिर्मुखमुखकमलानांविकासनेभानुःअद्भुतमस्करमुखांबुजानिमीलनेरात्रिशीतभानुस्त्वं॥अत्रएकस्मेवरामस्यभानुश्चेतभानुःतादात्म्यकथनात्विरोधःप्रतीतःसचाभासीभवतितत्तादात्म्यस्यतदुभयकार्यकारित्वेनोपचारिकत्वात्विरोधोक्तिर्विभावनेलक्ष्यते॥सतिकारणपोषकत्वेविरोधोक्तिःफलंनचेत्॥तस्मिन्नाविद्यमानेपिकार्यस्याज्ञेहिभाना॥इहलोकमर्यादातिक्रमेणकारणभावेकार्यानुदयरूपस्यविरोधस्योक्तिर्विरोधोक्तिता॥यथाकारणंविनैवकार्यस्योद्भवनंविभावनेतिअन्वर्थमनयोःरामअतएवविरोधपेटिकसंगतेः।दूयंयथा॥श्रीरामवीरतववैरिवरांगनानांदृष्टिर्बभूवनयनेषुविनापयोदैःचिरंनसाश्रमयतिस्मनिरंतरालधारालतामुपगतापितदंगतापं॥अत्रप्रसिद्धकारणंमेघंनिषिध्यकार्यंनिषिध्यतेअप्रसिद्धकारणंदुःखमस्त्येवतथाप्रसिद्धजलधाराकारणोपितापशांत्यभावोनिबंधःअप्रसिद्धकारणंतुनेश्चिलंनास्त्येवनिमित्तोपादानानुपादानाभ्यांअनयोर्द्वैविध्यंअत्रवैरिसंबंधरूपस्यनिमित्तस्योपादानादेकःप्रभेदउदाहृतःइतरप्रभेदयोरेतद्द्वैपरित्येनोदाहरणेबोधेविषमालंकारंलक्ष्यति॥हेतोर्विलक्षणोस्तोघटनेवावरूपयोः॥अनिष्टजननेचस्याद्विषमालंकृतिस्त्रिधा॥एषांत्रयाणामपिभेदानांवैषम्यगर्भत्वाद्विषमशब्दत्वात्प्रवृत्तिः कारणविलक्षणकार्योत्पत्तेस्तोपरस्परविरूपघटनेदृष्टप्राप्तयोर्व्याप्रियमाणस्यानिष्टनिष्पत्तौचविरोधस्यजागरूपकत्वात्तत्पेटिकासंगतिः॥तत्रकारणविरोधकार्योदयोयथा॥रघुराढ्प्रतापवडवानलात्द्विषदुन्मिषद्बलसमुद्रजीवनं॥एभसेनशोषयितुंमुद्यतादभूद्रणरंगभूर्थनकंबंधबंधुरा॥अत्रजलशोषकात्वडवानलाज्ज्वालोदयलक्षणविलक्षणकार्योदयःरूपकश्लेषानुप्राणितोयंप्रभेदःकाकुस्तुकर्कटककोमलमर्कटेस्वमस्माद्दशोग्रसमरेकिमरेप्रवृत्तः॥वधुद्रुतंव्यवसितोविसृतंतुपाशैःसंवर्तसागरतरंगमतंगजेंद्रान्द्रंरामंप्रतिरावणवचनंअत्रविरूपयोर्दुर्बलप्रबलयोर्युधघटना॥यान्यात्मरक्षणकृतोनिशितानिशस्त्राण्यादाययोधुमभिजग्मुररातिवीराः॥रामंविनेशुरवनीरामवेद्यमुरुकैः स्तैरेवसंकरपथेचकितद्रवंतः॥अत्रारिपूणांनिशितहेतिधारणमात्मरक्षणकारणं

नामृदितियुक्ततावदासांप्रस्तुतनिधनसाधनमेवाभ्यूह्यतेअस्यविषमवैधर्म्यरूपत्वाद्विषमस्यचत्रिविधत्वा
त्त्रिविरूपघटनात्मकविषमप्रभेदप्रातिभट्येनान्योन्यानुगुणवस्तुघटनात्मकराकः समालंकारप्रभेदः परिणि
तः प्राचीनैः अपरेतुविसदृशकार्योत्पत्तिवैधर्म्येणोत्समालंकारप्रभेदंस्वरूपकार्योत्पत्तिमुखेनावतारयंतिअनिष्ट
निष्पत्तिवैधर्म्येणोत्पादनमेवेच्छास्तैर्वैरूप्येक्षितं॥अनुगुणघटनायथा॥अन्योन्यानुगुणोयोगोजानकीरघुरा
मयोः॥रेजेप्रत्यग्रतारुण्यलक्ष्मीशृंगारयोरिव॥अनुगुणकार्योत्पत्तिर्यथा॥रामतवरवद्भुधुमः कोमलतापिछप
ल्लवश्यामः॥उचितंमालिनीकुरुतेरिपुधरणीभृत्यशोभुकुरं॥आधारानानुगुण्यंचेदाधेयस्याधिकंभवेत्॥आ
धाराधेययोरानुगुण्याभावेपिविरोधदंतहस्तएवेत्यस्याप्यत्रानिरूपणं॥यथा॥रामप्रतापयशसांप्रकोरेरनंते
सपाडितेरणुतरांडकटाहमध्ये॥अद्रीयतेकथमहोहिमहेमशैलब्यूहैरिवहृदद्भरीमणिदर्पणोघे॥असंगतिंल
क्षयति॥असंगतिर्हेतुफलेभिन्नाधिकरणेयदि॥व्यधिकरणयोः कार्यकारणभावस्यविरुद्धत्वात्असंगतिः न
चविरोधांतरभावः शंक्यः सामानाधिकरण्येविरोधः वैय्यधिकरण्येत्वसंगतिरितिव्यवस्थितत्वात्॥कोणाघा
तः कृतोधाटीपटहेरामकिंकरैः॥द्विषांहृदिभिदांचक्रेघोषंतेषांचयोषितां॥व्याघातंलक्षयति॥विहितेकेनचि
त्॥कर्त्राकार्यंकेनापिहेतुना॥तेनैवान्योन्यथयतितच्चे॥हस्यलंकृतिः॥तेनैवहेतुनातस्यैवकार्यस्यान्यथाकर
णेविरोधस्फूर्तेर्व्याहतिः॥यथा॥ममैवव्यायोगेनरकासुरवधेत्यस्यप्रभंजनाधममाक्रांतपुरंदरालयंवारंस्वा
घंतेकिंपुरुषाश्चर्वितबहिर्मुखंमृधेषेनं॥अनेनपद्येनजीमूतनामानरकासुरसारथिः स्वस्वामिनःस्फूर्तिंकृत
वान्कृष्णसारथिर्दारुकस्तत्प्रभामित्यादिरूपेणतदेवपद्यंपठित्वास्फूर्तिमन्यथयतिस्म॥युक्तिंलक्षयति॥
दुर्घटार्थस्यघटनाचातुर्यंयुक्त्यलंकृतिः॥यथा॥ससर्जालानूमहोतालानूसकृदेकेनपात्रिणा॥सहस्रंचातप
त्राणांरावणस्यानुनाहिभुः॥अस्यदुर्घटघटनासाम्यादवांतरसंगतिः॥अथभाविकालंकारस्यलोकव्यवहार
मूलत्वेनविरोधमूलत्वाभावेपितल्लक्षणपर्यालोचनायांकथंचिद्विरोधस्फूर्तेरवांतरसंगतिंमन्वानः॥तल्लक्ष ३४
णमाह॥भवेद्यत्राद्भुतार्थस्यवर्णनाद्भूतभाविनोः॥अपरोक्षायमाणत्वंतत्रभाविकमुच्यते॥यत्रअद्भुतवस्तु
वर्णनयाभूतभाविनोरपिवस्तुनोभाविकानांहृदिभावनावशेनप्रत्यक्षायमाणत्वंतत्रभाविकालंकारः अध्यव

सायाभावान्नायमुल्लेखः॥अतिशयोक्तिर्वाभ्रांतिर्वारसादेः भाव्यंतस्यवात्राभावान्नभ्रांतिमद्रसवदाद्यंतर्भावः भावना
वशेनहरितयेवोदयमानतयानाविरोधाभासतापि॥यथा॥रोषेणशोणंदृक्कोणंकृत्वारामेससाहसा॥उदन्वानप्यु
भुधन्वाधन्वानमयातिक्षणात्॥अत्रस्वकलनदीपयःपूरविश्रांतिभूमितयाकदाचिदप्यसंभावितशोषस्याब्धे
र्मरुभूमिताद्भुतार्थोक्तोतरभावनयाअपरोक्षतायारितिभाविकलंभवति॥अन्योन्यंलक्षयति॥तत्रान्योन्यंमिथो
यत्रकार्यकारणताभवेत्॥द्वयोःपरस्परोपकार्योपकारकभावेविरोधस्यलब्धप्रसरतयासंगतिः गुणेर्विभूषि
तोरामः तेचरामेणभूषिताः॥रत्नैरिवस्वर्णशैलः स्वर्णशैलेनरत्नवत्॥विचित्रंलक्षयति॥विचित्रंस्याद्विरूध
स्यफलस्याप्येसमुद्यमे॥यथा॥परमोन्नतलाभायसर्वेसर्वंसहाधिपाः॥नमंतिरघुवीरस्यपादपीठाग्रभू
तले॥अस्यकारणाद्विपरीतकार्योत्पादाद्विरोधस्फूर्तेर्पोढिकासंगतिः नचअस्यविसदृशकार्योत्पत्तिरूपाविषमा
लंकारप्रभेदादभेदइतिवाच्यंकारणप्रतिषेधद्वाराअत्रकार्यवैपरीत्यप्रतीतिः कार्यवैपरीत्यप्रतीत्याकारणप्र
तिषेधस्तत्रेतिभिन्नाविषयत्वात्॥राजानोयादिपरमोन्नत्यमभिलषंतिकिमितितर्हिनमंतीतिकारणप्रतिषे
धमुखेनकार्यवैपरीत्यंविचित्रालंकारविषयः॥विषमालंकारेतुकार्यवैपरीत्यप्रतीत्याकारणनिषेधदृष्टिरि
तिध्येयं॥रामकार्मुकजीमूतः कुलंवैरिमहीभृतां॥कर्तुंनिर्जीवनंघोरधारासारंत्रवर्षति॥सामान्यंलक्षयति॥
सामान्यंगुणसाम्येनयत्रवस्त्वंतरैक्यता॥यत्रैकस्यवस्तुनोगुणसाम्येनवस्त्वंतरतादात्म्यप्रतितिर्भवतितत्रसा
मान्यालंकारः॥अत्रगुणसाम्येनेत्यनेनमीलितव्यावृत्तिः॥नाहिमीलितेगुणवतापरेणपरातिरोधानंअपितु
वस्तुनावस्त्वंतराच्छादनमात्रंसामान्यपदेनतद्गुणव्यावृत्तिः॥नाहितद्गुणेगुणसामान्यंनिमित्तंनचव्याजोक्तिः॥
व्याजस्यानुक्तेः किंतुभातिरोधानानुभापन्हवः अनपलापात्॥अतएवसामान्यपदप्रवृत्तिः॥यथा॥त्रैलोक्येपि
विजृंभितेरघुपतेः शुंभद्यशः संभ्रमेपेयद्रव्यकृतः कालिंदवतयासोरिचकोरीगगतः॥शांतोवाहनगोचरः शिवश
चीप्राणेशयोः सास्रयापक्षेराधुधवाहनभ्रमकृत्तोलक्ष्मीशावागीशयोः॥दृहरामयशोधवलिम्नासुधांचंद्रि
यो॥दृषभोक्षेश्रवसोः शंखवहंसयोश्चभेदस्तिरोहितः॥अतएवद्वयोर्देभेदकत्वमुक्तं॥अथेतल्लक्षणवाक्यस्य
पदव्यावर्त्यानांमीलनाद्यालंकाराणांलक्षणान्याह॥मीलनंवस्तुनैकेनवस्त्वंतरनिगूहनं॥एताहिविधं॥स

हजेनागंतुकंतिरोधानंअगंतुकेनसहजतिरोधानंचयथा॥ कनकमुकुलरम्यरामरामाकलितकपोलकलाविलास
लक्ष्मीः॥ तिरयतिनवचंपकावतंसश्रवणकलापकलापकांतिलीलां॥ अत्रसहजेनकपोलकांतिरूपेणवस्तु
नाअगंतुकचंपककनकताटंकादिशोभारूपंवस्तुतिरोधीयते॥ रामहेतिहतारातिकामिनीकुचकुंभयोः॥ ई
षातिरोहितः पुष्पचापशोकज्वरोष्मणा॥ इहयुवतिकुचयोः सहजऊष्माआगंतुकेनकामशोकज्वरोष्मणा
तिरोधीयते॥ तद्गुणःस्वगुणत्यागात्परबलान्यगुणाहृतेः॥ अयमिहविवेकः॥ यत्रसमानगुणसंबंधेसत्येवान्य
स्यान्याछादकत्वंतत्रसामान्यालंकारः॥ यत्रगुणवैसादृश्येसत्येवदुर्बलनिजगुणहानेनसन्निधिमाहात्म्यात्प्र
बलपरगुणः स्वीकारः तत्रतद्गुणालंकारः॥ यत्रगुणोपादानादिवस्तुयावस्तूनोवस्त्वंतरेणाछादनंतत्रमीलो
लंकारः॥ यत्रसादृश्येनकस्यचिदपलापस्तत्रापन्हवः॥ स्वगुणहानेनतस्यपरस्यगुणोक्तेतद्गुणपदप्रवृत्तिः॥
यथा॥ विश्रंभस्तिमितोदिवाविधिगिरेः पश्चात्यसानूगतानित्यध्वांतमधीमलीमसतमारामस्यवेहेषिणः॥ की
र्त्याहारपटीरहारसुचिरस्फूर्त्याविलेघावतः सत्काकाण्यमनादिसिद्धमपितेस्फूर्तिंययुः स्फाटिकेः॥ यथा
वा॥ रामकीर्त्यधवलितेत्रैलोक्येवाहनेकलिः॥ बभूवभर्गयमयोः वातन्येवार्धिशार्ङ्गिणोः॥ एतत्प्रतिपक्ष्या
दतद्गुणंलक्षयति॥ सतिहेतौपरगुणास्वीकारेस्यादतद्गुणः॥ हेतुः सन्निधिः प्रबलगुणस्यअस्यकार्यकारण
भावानादरान्नावि शेषोक्त्यभेदशंका॥ यथा॥ तमालदलनीलाभिः कीर्तिभिः रात्रुभूभृतांरामकीर्तिः परीतादि
परभागंप्रपद्यते॥ यत्नेनसंहृतंवस्तुकुतश्चिद्विवृतंयदिनिगूह्यतेन्यविधयाव्याजोक्तिस्तत्रकथ्यते॥ नन्वपन्हु
वालंकारादस्यकथंभेदइतिचेदुच्यते तत्राह्यप्रकृतस्याप्रकृतसादृश्यलक्षणफलकटाक्षेणप्रकृतमपल
प्याप्रकृतमारोप्यते॥ इहतुसिद्धमेवसादृश्यं॥ साधनतयावलंब्यानिन्हवः क्रियतेनेनोभयोरप्यपन्हव
पूर्वकत्वाविशेषेपिसादृश्यस्यफलत्वसाधनत्वाभ्यांभेदः॥ यथा॥ श्रीरामापरिमेयवैभवभवद्भीभटै
रुद्भटैः स्वामास्यान्महतोहतान्युधिहितानाकर्णयंतोद्विषः॥ तद्वीक्ष्याजनितान्त्रकंपजडिमश्वासाश्रुमो
हादिकान्॥ भावान्बंधुविपद्व्यथाप्रकटनोपायैः समाछादयन्॥ अत्ररामभद्रभयजनिताः प्रकंपजा
ड्यादयोभावाः यत्नेनसंहृताअपिकथंचिदभिव्यक्ताबंधुवियोगशोकाभिनयेननिन्हुताइतिभवतिव्या

जोक्तिः॥ अथोक्तिस्वसाम्यात्स्वभावोक्त्यादीन्कतिचिदलंकारान्लक्षयति॥ स्वभावोक्तिर्भवेच्चारुयथावर्णस्व
नं। यथामदीयेकंसवधनाटके वक्षोजांगणचुंबितुंविरुचिरामाबिभ्रतीचलत्कीमीषद्दर्शितबाहुमूलसुषमंत
र्नीस्टशंतीनरवेः॥ मंदस्पंदितकुंडलालकभरामाधुर्यधुर्यस्वराकिंचित्कुड्मलितेक्षणास्मितसुरभीकेयंशनैर्गाय
तिमिथश्चमाक्रिबालापोयः प्रश्नोत्तरिकाहिसाभीताश्चर्यात्रजाकिंतुकिंनररवेः काश्यंकुतोदृश्यतेसंमोहेनमुहु
र्मुहुर्वतकुतोबिंबस्यानिर्भेदनात्॥ किंमिंदंतिहताहितारघुभुवाकुक्षेनसुप्तेपुनः केमूर्छांशमयंतिशीकरकराः
शुंडालशुंडालताः॥ इयमुत्तरस्यप्रश्नपरगतत्वेविशेषतश्चमत्कारोत्पि॥ यथाकिंसुकुमुखमनुकुरुतेकामार्तिंवदति
दुःसहांधारःकिंनरगीतंमधुरंकिंपुरुषमुखंतुरंगमुखसदृशं॥ उत्तरंप्रश्नपूर्वंचेदुत्तराद्वावहिर्भवेत्॥ प्रश्नउ
न्नीयतेतत्रभवेद्विधमुत्तरं॥ अत्रपरिसंख्याव्युदासायव्यवच्छेद्यंविनेवेतिविशेषणंदेयं॥ यत्रप्रश्नपूर्वकमु
त्तरमुपनिबध्येततत्रैकमुत्तरंयत्रानुपनिबध्यस्वेवप्रश्नस्योत्तरसामर्थ्याद्वाहिरुन्नयनं तत्रापरंक्रमेणय
था॥ कोराजपारिप्लवोपूज्यतरोकथयसंगरहितोयो॥ कोवापंडितगुछोश्लाघ्यतरोभ्रमरहिततयोपेतो
तादृग्भोज्यसमस्तवस्तुसहितंसंलभ्यराज्यंवयंभोपुत्राभयविद्दूलारघुपतेरध्यास्महेकाननं॥ एतेवन्य
गजानयोषितगजास्मान्मतेनवानामीवन्यतयोपयांतिचमरगायुष्मामिराकारिताः॥ अत्रयथापूर्ववदं
तिनाकिमितिननमंतिकिमिक्षादूताहरिणाश्चनसंनिधिमुपयांतीतिशेषेप्रश्नःपितदुत्तरसामर्थ्याद्वा
हिरुन्नयः नमंतइतिकर्मकर्तरिरूपंनदुहस्तनमांयकिंत्वणावितिनिषेधात्सिद्धं॥ अन्यथोदितवाक्यस्यका
कश्लेषेणवान्यथा॥ योजनंक्रियतेतत्रवक्रोक्तिः स्यादलंकृतिः॥ तत्रश्लेषेणयथा॥ कांतेकुप्यसिकिंमयात्व
यिकृतंलक्ष्मानकिंचित्कृतं॥ प्रेमस्फारगिराशयेममदरंरंभोरुदूरीकुरु॥ शारदःशत्रुजयेकरेतवभवेन्नोसांप्रतं
तिष्ठतित्यालोपेःकुपितावदेहतनयारामंव्यधान्नोमनः॥ अत्रश्लेषेणमयेतिमलब्धाभिप्रायेणवाक्येप्रयुक्ते
देव्यारमाशब्दमवलंब्यान्यथायोजितं॥ काकूदाहरणंयथा॥ दधानेधरणीचक्रमेकस्मिन्नामतेभुजे शेषना
गानलज्जंतेबहवोभूधराधराः॥ अत्रहेरामत्वद्भुजेनैकेनैवधार्यमाणांधरणींशेषदिग्गजाः संभूयदधा
नालज्जंतएवअतस्त्वद्भुजस्येतरभूमिधुरंधरसाधारण्यंकिमित्यापादयसीतिकाकाप्रतीयते॥ अथलो

कब्यवहारमूलेषवशिष्टानलंकारानिलक्षयिषुःप्रथमनीकंतावल्लक्षयति॥प्रतिपक्षस्यबलिनःप्रतीकारेकदुष्कृते॥तदीयस्यातिरस्कारःप्रथमनीकमुदीर्यतेयथा॥जगदुपकृतौलावण्येचत्वयारघुभूपतेसरसिजसकृद्दृष्टाकासोमावुभावपिनिर्जितौ॥तवविततुतौधाम्नांभूम्नामुखेनचतुर्ष्वतां बतभगवतोकांतिकूर्तिंकृशानुसरोजयो॥अत्रजगदुपकारलावण्यगुणयोःरामेणपराभूतोरविशशिनोतत्प्रतीकाराक्षमोतत्तेजोमुखसरसयोःकृशानुकमलयोःकांतिक्षयंकुरुतएवकथ्यतेतेनानीकाभिभवाशक्तस्यकस्यचित्प्रथमनीकाभिभावकत्वदर्शनादयमपितादृगितिप्रथमनीकमित्युच्यते॥प्रतीपमाह॥यत्रोपमानस्याक्षेपःकेमर्थक्येनकथ्यते यद्वोपमेयभावोत्रप्रतीपंस्यादलंकृतिः॥यत्रोपमेयस्यलोकोत्तरतामभिव्यक्तुमुपमानस्यकेमर्थक्यमुपःपाद्यतेयद्वोपमानस्योपमेयतांक्रियतेसोयंद्वेधाप्रतीपालंकारः॥पक्षद्वयेप्युपमानस्यस्वरूपापेक्षयाप्रतिकूल्यंवाचोयुक्तेःप्रतीपपदप्रवृत्तिः यथा॥अश्रांतविश्रांतिकलाधुरीणपाणेरघूणांप्रवरेविधाता॥विबुधद्रुमादीन्विफलान्विचिंत्यस्वर्लोकशोभाजननेन्ययुंक्तअनेकमुरमाणिक्यबलयोल्लसिताकृतिः॥पातिःकुंडलिनांरामदोर्दंडइवहिंडते॥अत्रउपमानतयाप्रसिद्धस्यशेषस्योपमेयीकरणंरामभुजापेक्षयातस्यापकर्षमभिव्यनक्ति॥सूक्ष्ममाह॥यद्संलक्षितंसूक्ष्मंसूक्ष्मंस्यात्तत्प्रकाशने॥अत्रसूक्ष्मत्वंनामनिपुणतरमात्रज्ञेयत्वंतादृगर्थस्यकथंचित्प्रकाशनेसूक्ष्मालंकारः यथा साक्षेःसंग्रामरूक्षैरिहशतमखजिल्कुंभकर्णादिकायैस्त्रातांसीतांचतुर्भिःकथमिवमनुजोनेतुमेकःक्षमेत॥इत्यसेकश्लाघान्सदसिनिगदितेरावणायात्वजन्मापर्यंतस्तंभसंस्थस्फटिकघटितमुपादर्शयद्बुद्धिशाली यथा श्वेतवराहकोपिमहासत्त्वतयाचतुःसमुद्रीसमावृतामपिविस्तंभरांदंष्ट्रामात्रसहायउद्दधाररामभद्रएकोप्यपरिमेयशक्तिरनुजमात्रसहायोभवदुक्तेर्महावीरैरक्षत्रमुरवेश्चतुर्भिर्नुसामपिसीतांनेष्यत्येवंरूपः सूक्ष्मार्थःप्रकाशितः॥उदात्तालंकारंलक्षयति॥उदात्तालंकृतिःसास्याद्यत्समृद्धार्थवर्णनं॥अर्थवर्णनमात्रस्यस्वभावोक्त्यतिप्रसंजकत्वात्समृद्धेरुक्तं॥नचभाविकाभेदःतत्रापियथास्थितस्यैववस्तुनोभूतभाविध्यवसायकारेणानुभवग्रथनात् यथा॥अंतर्लीनेंद्रनीलोपलदलकुसुमापांकुलेहारहीरस्फारांशूदारनीरेरुचिरमरकतस्फूर्तिशैवालजाले॥नानारत्नात्मकेली

डाक्टर भाऊ दाजी MEMORIAL

गिरिवरजुषिस्मेरकासारसारविहन्नारीविहाराविदधतिविशदांराघवोदार्यलीलां॥अनुकल्पंजल्पति॥अनुकल्पस्तुल्योक्तिर्मुख्योःकैःसमनंतरं॥मुख्यांकिंचित्प्रधानत्वेनाभिधायतदितरमुख्यासभवनयोगेणाभिधानमनुकल्पः यथा॥श्लाघ्यःकोदंडविद्यायांराघवोरावणोपिवायथाध्वांतहृतोदक्षःतपनोदहनोथवा॥ननूभयोर्वैकल्यिकत्वेनाविकल्पालंकारःकिन्नस्यात्मैवंतुल्यबलत्वेहिविकल्पःनचात्रतुल्यबलतातपनापेक्षयादहनवद्रामापेक्षयारावणस्यजघन्यत्वात्अथरसवदाद्यलंकाराणांलक्षणोदाहरणानिदर्श्यंते॥अंगभावंरसोत्रभावंप्रत्यवारसं॥भजेततन्नरसवदलंकारउदीर्यते॥प्रेयोलंकृतिरंगंचेत्भावोभावांतरंव्रजेत्॥रसभासोथवाभावाभासोयत्ररसस्यवा॥भावस्यांगंभवेत्तत्रप्राहुरूर्जस्व्यलंक्रियां॥समाहितालंकृतिःस्यात्भावांगेभावसंक्षये॥गौरीसाक्षात्रतिंतमाद्यदुरितंदूरीकरोतुस्वतश्चिन्नस्थाणुरशोकतामुपगतोमूलोल्लसितोनारसः॥यस्याःपादहतःप्रणामनिरतःकोपप्रसादायालाक्षालक्ष्मिषेणखुष्पकलिकालक्ष्मीरमालंबते॥इहशृंगारःकविनिबद्धस्यगौरीमुद्दिश्यप्रवृत्तस्यभंगतांभजतिभावस्य॥घोटीघोरखुरक्षतक्षितिरजःस्फारांधकारावृतेसंयद्वान्निसुरवेरुपाणलतिकादूतीकृतालंबना॥शुंडालद्युतिडंबरांबरधराशूरोपभोगोन्मुखीशानुश्रीरभिसारिकारघुपतेरंगंसमालिंगति॥अत्रवीरशृंगाररसयोरंगांगीभावः॥त्वत्सेनापटमंडपाग्रनिहितोसौवर्णकुंभाविमौकिंत्वद्बंधुरगंधसिंधुरविभोःकुंभाविमौकिन्विति॥कांतारांतरगोचरारघुपतेःकांताजनानांकुचाभोगोवीक्ष्यावितर्कयंतिचकिताःप्रत्यर्थिनःपार्थिवाः॥अत्रत्रासवितर्कयोर्व्यभिचारिभावयोरंगांगिभावः॥रामतद्धैरिणःकांताकांतारांतरचारिणी॥विलोक्यहास्तिनोःक्रीडांकंठमालंबतेरसात्॥अत्रातिर्यग्गतेरसाभासःशृंगाररसांगं॥दुर्वारायुधिपत्रिणोरघुपतेर्मांसंहरंतेषुरामांसंदेहधरोस्मिभामिनितःस्वास्थ्यंसमापादय॥इत्थंजल्पतिरावणेजनकजासंसत्समेवोक्तवानस्मीत्यंतपदावलींपठपुनर्दैत्याधमेत्यब्रवीत्अत्रकामुकस्यरावणस्यगर्वाभासःसीतायाअमर्षभावंप्रत्यंगं॥दयितजनवियोगाद्दारुणग्लानिभाजोरविरुशशिनोतुल्योरामसीतासुरेंद्रू॥तदनुपवनसूनुप्रापितान्योन्यभूषोप्रशमितपरिखेदोप्राप्तपूर्णेंदुशोभो॥अत्रनगलोनिशांनिर्हर्षस्यांगं॥अथानिरूपितानामेवैतेषामलंकाराणां

द्विविधानामप्यन्योन्यालिंगनभंग्यालब्धस्वरूपोसंसृष्टिसंकरसंज्ञावलंकारोनिरूपयितुमारभते॥ ननुचेतदनुपपन्नं शब्दार्थालंकाराणामेषामेवान्योन्यमिलितानांसंसृष्टिसंकरपदवेदनीयत्वात्कथमनयोःपार्थक्येनपरिगणनार्हतेतिचेत्तत्राह॥ सौवर्णाभरणानिलोकविदितान्येकैकशःशोभनान्यप्यन्योन्यकरांगितान्यमिनवांपुष्णंतिशोभांयथा॥ कुर्वंत्योपिसमाश्रियांपृथगिमाःकाव्येद्विधालंक्रियाःसंसर्गेणचसंकरेणचतथाभूयश्चमत्कारिकाः॥ तत्रसृष्टिमाचष्टेतिलतंडुलसंश्लेषभंग्यावास्थास्परस्परं॥ अलंकृतीनांघटनासासंसृष्टिर्निगद्यते॥ आसामलंकृतीनांस्वावांतरभेदभिन्नानांपरस्परनैरपेक्ष्येणैकत्रैवतिलतंडुलन्यायेनसंयोगस्तयास्थितिःसंसृष्टिः॥ साशब्दार्थोभयालंकारगतत्वेनात्रिविधा॥ तत्रशब्दालंकारसंसृष्टिर्यथा॥ युधश्रधासमिधात्रथमविगणनासित्थंमूर्ध्न्यभूषायोधाबाधाबंधोधारघुधरणिभुजाछिन्नदोःस्कंधबंधाः॥ लंकालंकारकारादिविजाविजयिनोराक्षसास्रक्षसारा हंताहंतामहांतः समरसमरसाःप्रेततांप्रापितास्ते॥ अहंतयाअहंकारेणमहांतः अत्रप्रत्यनुप्रासछेकानुप्रासयमकानांसंसृष्टिः॥ अर्थालंकारसंसृष्टिर्यथा॥ संवर्तावसरप्रसारिदिनकृत्सर्वंस्वपाटच्चरोदेयध्वांतहरःप्रतापतपनोरामस्यकोप्युद्ववन्भूमिंद्यामपिकोशिकोत्सववतींचक्रेद्रुतंवर्धयन्नुस्तारानेतरिनूतनाश्रियमधास्योरस्यदेशोतमः॥ अत्रपूर्वार्धेदिनकृत्सर्वंस्वपाटच्चरइत्यत्रसर्वस्वशब्देनतेजःसमूहेर्लक्षितस्तत्तस्याश्चसंवर्तवर्तिविकर्तनमात्रहेतुत्वेनरामप्रतापतपनासंबंधात्तत्सादृश्यमाक्षिप्यतदितिनिदर्शनया॥ तथादेयध्वांतहरइत्यत्रस्वरूपकमितितयोःसंसृष्टिः तदुभयोपस्थापितयोरतिशयोक्त्यर्थश्लेषयोश्चउत्तरार्धेतथाकोशिकोत्सववतीशब्दश्लेषप्रतिभोत्थापितोव्यतिरेकाविरोधाभासो॥ तथातारानेतृशब्दश्लेषाभ्यांतथातमःपोरस्यशब्दश्लेषाभ्यांचेतितेषांसर्वेषांसंसृष्टिः॥ शब्दार्थालंकारसंसृष्टिर्यथा॥ भोतार्ष्ण्याग्रजकिन्नुकिन्नरवेःकार्यंकुतोदृश्यते॥ संमोहेनमुहुर्मुहुर्वतकुतोबिंबस्यसंभेदनात्॥ केभिर्दंतिदतांहितारघुभुवाकुत्सेनयुधेपुनःकेमूर्छाशमयंतिशीकरकराःशुंडालशुंडालताः॥ अत्रदृश्यनुप्रासयमकाभ्यांसहप्रश्नोत्तरिकायाःअतिशयोक्त्योश्चसंसृष्टिः॥ यथावा॥ विरिंचिवनिताकरांचितावपंचिकासंचरत्स्वरत्नसरमाधुरीरसरमाधुरीणागिरः॥ जयंतिममंदरक्षमितसिंधुबंधुभ्रमानिर्गलद्विनिर्गलद्दुलभंगभंगीभृतः॥ अत्राविपंचिकास्वरधर्मस्यमाधुर्य

स्यतरंगस्यनिर्गलत्वभंग्याश्चवचनेष्वसंभवान्नसादृश्यासेपान्निदर्शना॥ ताभ्यांदृश्यनुप्रासस्यसंसृष्टिः॥ एवमन्यत्रापिद्रष्टव्यं॥ संकरंलक्षयति॥ क्षीरनीरन्यायेनयोगःसंकरःसमुदीर्यते॥ अंगांगिभावात्संदेहाद्वाचिकैक्यात्तुत्रिधा॥ अंगांगिभावेनसंकरोयथा॥ संवर्धयंतंनिजजीवनेनशुचिंसदावाडवमंबुराशिं॥ संदृश्यरामस्यशरस्त्रुषावान्निषंगगर्भंनिभृतोधिशेते॥ अत्रजीवनशुचिवाडवशब्दश्लेषमूलातिशयोक्त्याभेदेसत्यभेदाध्यवसानरूपयासागरःस्वप्राणेनशुश्रूषाल्लक्ष्मणपोषकइतिप्रतीयतेतद्धिनांशरूपानुचितकर्माचरणजनितालज्जारामशरनिषंगकोटरशयनेहेतुतयाउल्लेख्यतेसाचवाचकपदाभावाद्गम्येतिशयोक्तिरलंकारोंगं॥ संकरः॥ यथावा॥ भानुःकिंसनभोगमार्गचतुरःकिंवाबकोयंजनाःसर्वज्ञाप्यनलंतमाहरपिचक्षय्योजडेनाप्यसौकिंचंद्राःसनिजोदयेनवसुधासंमोदमंकूरयत्येवंरामममवेक्ष्यनिर्मलगुणैःपश्चाद्विभिन्नेतते॥ अत्ररामेतेजस्वितादिधर्मसाम्यात्सूर्यादिरूपेणसंदिग्धपश्चाद्धेषधर्मोल्लेखेनांतेगुणैर्निश्चिन्वतइतिनिश्चयोरराकारान्निश्चयांतःसंदेहःसचनभोगेत्यादिश्लेषपदोपात्तानांतत्तदर्थानांभेदेसत्यभेदाध्यवसायरूपातिशयोक्त्यनुप्राणितइत्यंगांगीभावेनसंकरः सूर्यादिव्यतिरेकस्फुटःकिंचानिरतिशयतेजस्वित्वादिरूपेणसूर्यादिरूपतायामेकदेशमंगीकृत्यएकदेशांतरनिषेधस्याक्रियमाणस्यश्रीरामचंद्रविषयेआनेर्वचनाग्रोरतारूपविशेषाक्षेपकत्वादाक्षेपालंकारः अपिचप्रसिद्धेषुरविशशिकृशानुष्वेकस्यापिरघुपतितुल्यतानाम्नूकिमुतान्येषुतेजस्विष्विति केमुतिकन्यायवशेनदंडापूपिकास्फूर्तेरर्थापत्त्यलंकारस्यगम्यमानत्वासंसृष्टिरित्यलंप्रपंचेन॥ अत्रपूर्वत्रचविजातीयालंकारसंकरउक्तः॥ सजातीयसंकरमाह॥ दोर्दंडाकिरणध्वस्तनक्तंचरतमस्तातेः॥ गजोदयाचलारूढोरामोरविरिवाबभौ॥ अत्ररामोरविरिवेत्युपमयादोर्दंडाकिरणयोर्निशाचरतमसोर्गजोदयाचलयोश्चोपमाप्रसाध्यतइतिसजातीयसंकरः॥ संदेहसंकरोयथा॥ सेनाधिपारघुपतेःसितरक्तनीलास्तस्रुः पूर्वंगपतयःपरिवार्यलंकां॥ व्यालोलवारानिधिवाचितटोपनीतफेनत्रवालदलशैवलराशिकल्पाः॥ अत्रसिंधुसलिलगतानांफेनविद्रुमशैवलानांतरंगसंहत्यातटेराशीभावस्यसंदेहात्तटगतकपीनांतटगतफेनाद्यभेदाध्यवसायस्यपाश्चि

कसमुन्मेषतयोपमोत्प्रेक्षयोः संदेहसंकरः॥ यथावा॥ पवलप्यदापदहणोतुहजाणइविरहवेअणासहनो॥ अभ
छहरहुंवीरोतुरिअंसअकोटिसारपरिवारो॥ हृदंसीताश्वासनपरान्निजटावचनंअत्रप्रतापएवदहनइतिवाप्रता
पोदहनइवेतिवासमाससंदेहोजायतेमयूरव्यंसकादयश्चउपमितंव्याघ्रादिभिः सामान्याप्रयोगइतिचसमास
हृयस्याप्यनुशासना॰ इवतिरूपकोपमयोः संदेहसंकरः साधकबाधकप्रमाणाभावेसंदेहस्यस्वरसवाहित्वात्
तदन्यतरस्यद्वावेतुभवतिसंदेहनिवृत्तिः॥ माहोउणअणणालिणंसहितुहवाहेणसंपदंमलिनं॥ आआदिरामभ
द्दोकइणिवंदंसंअअसमुद्दोछायामाभतुनयननालिनंसरिवतवबाष्पेणसांप्रतंमलिनं॥ आयातिरामभद्रः क
विनीतनगेंद्रसंयतसमुद्रः॥ अत्रनयनंनालिनमिवेत्युपमालंकारेबाष्पेणमलिनमितिवैशेषणमेवसाधकं
मानं॥ नयनएवबाष्पाबुसभावनात्॥ अपविक्रमसंकोचोदारणेधरणीभृतां॥ निर्धूतारिबलाटोपोरेजे
रामपुरंदरः इत्यत्ररूपकालंकारएवनोपमातांप्रत्यपविक्रमेत्यादिसाधारणधर्मप्रयोगस्येवबाधकत्वा
त्उपमितंव्याघ्रादिभिरित्यादिनासामान्याप्रयोगएवउपमितसमासविधानात्एकवाचकानुप्रवेशोनसं
